
अच्युतग्रन्थमालायास्तृतीयं पुष्पम् ।

74 ©

श्री महर्षिकात्यायनप्रणीतं—

शुल्बसूत्रम्



[illegible]

प्रकाशस्थानम्
अच्युतग्रन्थमाला-कार्यालयः
काशी

अच्युतग्रन्थमालायाः
तृतीयं पुष्पम् ।



शुल्बसूत्रम्

कात्यायनमहर्षिविरचितम्

काशीविश्वविद्यालयाध्यापकेन काशीस्थजोषीराम-
मटरूमल्लगोयेनका-संस्कृतमहाविद्यालयाध्यापकेन
च श्रीविद्याधरशर्मणा विरचितया सरलया
वृत्त्या सहितम् ।
तेनैव संशोध्य सम्पादितम् ।


प्रकाशस्थानम्—
अच्युतग्रन्थमाला-कार्यालय,
काशी ।

संवत् १९८५

प्रथमावृत्तिः १०००]

प्रकाशकः—
श्रेष्ठिप्रवर श्रीगौरीशङ्करगायेनक
अच्युतग्रन्थमाला-कार्यालय,
काशी ।





Q2:456
N28
7102

मुद्रकः—
माधव विष्णु पराड़कर,
ज्ञानमण्डल यन्त्रालय,
काशी ।

भूमिका ।

भगवतः करुणार्णवस्य परमेश्वरस्यासीमानुकम्पया साम्प्रतमिदं कात्यायनशुल्बसूत्रं सरलया वृत्त्या परिबृंहितमध्येतृमनस्तोषाय मुद्रितपूर्वं सत्प्रकाश्यते ।

ग्रन्थोऽयं कात्यानश्रौतसूत्रात्पृथग्भूतोऽपि परिशिष्टेष्वन्तर्गतः तेनैव च महर्षिणा प्रणीतः । अल्पीयानप्ययं ग्रन्थोऽतिकठिनो बहुभिर्व्याख्यातृभिर्व्याख्यातोऽपि तत्त्वबुभुत्सायां तिरोहित इवात्मानं गोपायतीति प्रायो विदितमेव । अत एव च पूर्वतनैर्व्याख्यानैर्बहुभिर्मण्डितोऽप्ययं सरलां व्याख्यामपेक्षत एवेति मन्यमानोऽस्य व्याख्याने प्रवृत्तोऽभवम् ।

अस्य ग्रन्थस्य मदुपलम्भगोचरं व्याख्याचतुष्टयं पूर्वमेव प्रथितम् । तत्रादिमं कर्काचार्यकृतं भाष्यम्, द्वितीयं महीधरकृतम्, तृतीयं रामचन्द्रवाजपेयिकृतम्, तुरीयं गङ्गाधरनिर्मितम् । रामचन्द्रवाजपेयिकृता कारिकाऽपि सूत्रानुसारिणी वृत्त्यभिधाना काचन वर्त्तते । कर्कभाष्यं वाराणस्यां चौखम्भामुद्रणालये मुद्रितम् । रामचन्द्रवाजपेयिकृतं व्याख्यानं त्रिंशद्वर्षेभ्यः पूर्वं पण्डितपत्रे मुद्रितं, तदसम्पूर्णमेव । मया तु पूर्वोक्तेभ्यश्चतुर्भ्यो व्याख्यानेभ्यः सारमादाय तत्र च नातीवोपयुक्तानंशान् परित्यज्य सरलशब्दसन्दर्भितेयं वृत्तिरारचिता । मन्ये ग्रन्थोऽयमिदानीं मत्कृतया वृत्त्या सनाथीकृतोऽध्येतॄणां किञ्चनावश्यं सौकर्यमापादयेदिति ।

(शुल्वपरिचयः)

श्रौतसूत्रे हि अग्निहोत्र-दर्शपूर्णमास-पशु-चातुर्मास्यादिषु हविर्यज्ञेषु, ज्योतिष्टोमादिसोमयागेषु च तत्कर्मोपयुक्तस्थानापेक्षायां सत्यां तेषु तेषु प्रकरणेषु वेदिराम्नाता । तस्याश्च स्वरूपं यावदपेक्षितं तदपि यथास्थानं निरूपितम् । एवं चयनादिष्वपि परिमाणविशेषविशिष्टेष्टकाविशेषसाध्यस्थण्डिलवत्सु इष्टकानामुपधानप्रकारः, (१) स्थण्डिलस्यायामतो विस्तारतश्च प्रमाणं, तदनुसारेण सौमिकवेदेर्वर्द्धनं, तदुपयोगितया प्रक्रमविवर्द्धनं, द्वितीयादिषु चयनेषु यदा स्थण्डिलस्वरूपविवृद्धिस्तदनुरोधेन इष्टकाविवर्द्धनं च तत्तत्प्रकरणे एव

(१) इष्टकानां प्रमाणं सङ्ख्यादिकं च इष्टकापूरणसूत्रतोऽवगन्तव्यम् ।

सूत्रकारेण समाम्नातम् । तेषां ये विशेषा अवश्यनिरूपणीया आसन्, यथा —अग्न्याधाने गार्हपत्याहवनीययो स्थानं निरूप्य वितृतीये दक्षिणाग्ने स्थानमुक्तम्। वितृतीयस्वरूपं तु न तत्र स्पष्टीकृतम्। एवं चातुर्मास्येषु रथ-युग-शम्याप्रमाणानि वेदेर्विकल्पेनाम्नातानि; रथादीनां स्वरूपं न तत्र निरूपितम्। तथा चयने सुपर्णचितेः स्वरूपं सुस्पष्टतया निरूपितम्, द्रोणचिदादीनां नाम्ना परमुपादानं कृतम्, तेषां स्वरूपादिकं न तत्र स्पष्टमपि। एवं चयनादिषु विवृद्धौ केनोपायेन कियता प्रमाणेन कियत्या च सङ्ख्यया इष्टकादयो वर्द्धनीयाः, तदनुसारेण वा विवृद्धिः कथं सम्पादनीया, इत्यादिकं तत्र तत्र सूत्रकारेण न निरूपितम्, ते च विशेषा अनिरूपिता अज्ञाताश्च उत्तरक्रतुषु अनुष्ठाने वैकल्यमापादयन्ति इति तेषामपि निरूपणमवश्यमापतितमिति मन्वानेन सूत्रकारेणायं श्रौतसूत्रपरिशिष्टरूपो ग्रन्थो निरमायि। अनेनाऽपि अनिरूपिताः केचनावशिष्टाः पदार्थाः समपीपदन्, तामपि त्रुटिं पूरयितुमेतद्ग्रन्थान्ते काश्चन कारिकाः सूत्रकारेण रचिताः, यासां नाम श्लोकशुल्वमिति, यासु कारिकासु तत्र तत्र वेदिनिर्माणार्थं निखातस्य शङ्कोः प्रमाणं प्रक्रमस्याङ्गुलादेर्मुद्गरादीनां च परिमाणं सुस्पष्टमुपवर्णितम्। एवं श्रौतसूत्रापेक्षितपदार्थसमर्पकोऽयं ग्रन्थस्तत्र ज्ञानविशेषं सम्पिपादयिषुभिरवश्य मध्येतव्य इति मत्वाऽस्यापि मुद्रणं कृतम् ।

बौधायनापस्तम्बाभ्यामपि शुल्वसूत्रमारचितम्। आपस्तम्बमहर्षिकृतं शुल्बसूत्रं प्रायशो बहुत्राक्षरशः संवदत्यनेन सूत्रेण। तस्य च व्याख्यात्रयमुपलभ्यते। एकं कपर्दिस्वामिकृतं भाष्यम्, अन्यत् करविन्दस्वामिकृतम्, अपरं च सुन्दरराजकृतम्। बौधायनीयशुल्बसूत्रं द्वारिकानाथयज्वकृतव्याख्यया युतं पण्डितपत्रे मुद्रितम्। इतरे च सूत्रकाराः शुल्बसूत्राणयरीरचन्न वा इत्यत्र तूष्णीं भाव एव शरणं यावदन्यतरनिश्चायकप्रमाणोपलम्भम्।

सूत्रकारस्य समयः, एतत्कृता ग्रन्थाः, अस्य रचना शैली इत्यादिकं तु श्रौतसूत्रभूमिकायामेव मया निरूपितमिति नात्र पिष्टं पिष्यते। दर्शपूर्णमास—सोमयागीयानां वेदीनां चित्राणि तेषां निर्माणप्रकारः, चयने च यावन्तः प्रकाराः, तेषां स्वरूपावेदकानि चित्राणि, तेषां रचनारीतयश्च श्रौतसूत्रेणैव साकं मुद्रिता इति तत एव ते सर्वेऽवगन्तव्याः ।

एवमीश्वरकृपया निर्मितस्यास्य विषये येभ्योऽहमधमर्णोऽति-
रां, तेषां मध्ये प्रथमतोऽस्मत्तातपादानां सर्वतन्त्राणामपरेषां कात्या-
नानां जगत्पूज्यचरणानामस्मद्गुरुभूतानां विद्वल्ललामभूतानां महा-
महोपाध्यायानां श्री १०६ प्रभुदत्तशास्त्रिणामाहिताग्नीनां चरणकमले-
ऽस्मदनुग्रहैकपरायणे अन्यत्कर्तुमनीशानः केवलं मनःकुसुमेनानवरत-
मर्चयामि, यत्प्रज्ञापारावारेऽनवरतमुल्लसन्त्या वैदिकविद्यावीचिपर-
म्परायाः लेशमात्रमधिगम्य प्रभुरभवमेतद्व्याख्याकरणे ।

ग्रन्थस्यास्य विलेखने येषामुपकार आसीत्, तेभ्यः श्रीमद्भ्यः
श्रीचन्द्रशेखरझामहोदयेभ्यः काशीस्थजोषीराममटरूमल्लगोयेनका
संस्कृतमहाविद्यालयाध्यापकेभ्यो ज्यौतिषाचार्येभ्यो महतीं कृतज्ञतां
प्रकटयामि ।

ग्रन्थस्यास्य मुद्रणविषये महान्तमपि व्ययभारमविगणय्य गैर्वा
णीवाणीप्रणयिभ्यो धार्मिकग्रन्थोद्धरणेऽनवरतमाविष्कृतादरेभ्यो
वैदिकपथप्रतिष्ठापने निबद्धकक्षेभ्यः सुरभारतीसेवायामेव समर्पित-
निजकरणत्रयेभ्यः, तदेव च परं पुरुषार्थं मन्वानेभ्यो विनयावनम्रेभ्यो
गुणैकनिधिभ्यः सनातनधर्मकमयजीवितेभ्यः श्रेष्ठिवर्येभ्यः श्रीगौरी-
शङ्करगोयेनकामहोदयेभ्यो महतीमाशीःपरम्परां हृदयेन वितरामि,
प्रार्थयामि च भगवन्तं लोकगुरुमुमापतिम्, सुरभारतीसमुद्रणैक-
फलेन इतोऽप्यधिकैश्वर्येण तादृशा चायुषा समेधयत्वेनमिति ।

येषां गुरुचरणानामसीमकृपया ग्रन्थोऽयं निर्विघ्नेन परिसमाप्ति
मवाप, तेषामेव श्रीविश्वनाथसदृशानामस्मत्तातपादानां महामहो-
पाध्यायानामग्निहोत्रिणां श्री १०६ मतां प्रभुदत्तशास्त्रिणां चरणकमल-
योरेव ग्रन्थमिमं समर्पयामि, तेन च मन्ये भगवान् विश्वेश्वरोऽपि
प्रीतो भवेदिति ।

शोधनादिव्यापारेऽत्यन्तं जागरूकेण स्थितवतोऽपि मम बहव्यो-
ऽशुद्धयस्तथैव स्थिताः । अतो विद्वज्जनान् विनम्रः प्रार्थये—पुनर्मु-
द्रणावसरे ते साक्षिगोचरीभूता अशुद्धीर्मह्यं निवेद्य मामनुगृह्णन्तिवति,
मयापि इतोऽप्यधिकतरमवहितेन ताः समीकरिष्यन्त इति ।

विदुषामनुचरः—
विद्याधरशर्मा ।

विषय-सूची ।

पृष्ठाङ्कः		सूत्राङ्कः
१	ग्रन्थकारप्रतिज्ञा	१
२	प्राचीसाधनम्	२
३	उदीचीसाधनम्	३
३	पाशकरणप्रकारः	४
३	रज्ज्वां चिह्नकरणं तत्स्थानानि च	५
५	शङ्कुनिखननम्	६–७
५	श्रोणिसाधनम्	८–१०
५	अंससाधनम्	११
६	निरञ्छनलक्षणम्	१२–१५
७	श्रोण्यंसस्थानम्	१६–१७
८	शकटमुखे चक्रने श्रोणिस्थानम्	१८
८	प्राग्वंशादीनां प्रमाणम्	१९–२०
९	सत्रे सदोमानम्	२१
९	सोमयागे सदोमानम्	२२
९	अपरिमितशब्दार्थः	२३
१०	प्रमाणापेक्षायां शुल्वस्य युक्तेश्च प्रामाण्यम्	२४–२५
१०	दक्षिणाग्निस्थानम्	२६–२७
११	उत्करस्थानम्	२८
१२	दक्षिणाश्युत्करयोः स्थानान्तरम	२९–३०

इति प्रथमा कण्डिका ।

१२	रथप्रमाणम्	१
१३	ईषाप्रमाणम्	२
१३	अक्षप्रमाणम्	३
१३	युगप्रमाणम्	४
१३	शम्याप्रमाणम्	५
१४	पितृमेधवेदेर्निरूपणम्	६
१४	रज्जुसंज्ञाः	७
१५	दशपद्याया वेदेः करणी	८
१५	चत्वारिंशत्पद्याया वेदेः करणी	९
१६	क्षेत्रज्ञानप्रकारः	११
१६	क्षेत्रद्वैगुण्यादिकरणप्रकारः	१२–१३
१७	त्रिकरणीसाधनम्	१४
१८	तृतीयकरणीकथनस्य प्रयोजनम्	१५–२०
१९	समचतुरस्राणामेकीकरणप्रकारः	२१–२२

इति द्वितीया कण्डिका ।

पृष्ठाङ्कः		सूत्राङ्कः
२०	महत्क्षेत्राल्लघुक्षेत्रस्य पृथक्करणप्रकारः	१
२१	दीर्घचतुरस्रस्य समचतुरस्रीकरणोपायः	२
२३	अतिदीर्घचतुरस्रस्य समचतुरस्रीकरणोपायः ...	३
२५	समचतुरस्रविषमचतुरस्रयोर्दीर्घचतुरस्रकरणोपायः ...	४
२७	अनादेशे चतुरस्रस्य ग्राह्यता	५
२८	करणीनां क्षेत्रफलम्	६–१२
२९	चतुरस्रस्य मण्डलकरणप्रकारः	१३
३०	वृत्तस्य चतुरस्रकरणोपायः	१४

इति तृतीया कण्डिका ।

३०	चितिनामानि	१
३१	द्रोणचितिनिर्माणप्रकारः	२–४
३२	प्रउगचितिनिर्माणप्रकारः	५
३३	उभयतः प्रउगचितिनिर्माणम्	६
३३	प्रउगचितेश्चतुरस्रीकरणोपायः	७
३४	उभयतः प्रउगचितेश्चतुरस्रीकरणम्	८
३५	त्रिकर्णपञ्चकर्णैककर्णद्विकर्णसमासः	९–१०

इति चतुर्थी कण्डिका ।

३६	पुरुषवृद्धिकथनप्रतिज्ञा	१
३७	अश्वमेधचयने विशेषः	२
३७	एकविंशतिविधस्याग्नेः कथनम्	३
३७	पुरुषवर्द्धनप्रकारः	४–८
४०	अङ्गुलादिमानम्	९
४०	पुरुषवर्द्धने प्रकारान्तरम्	१०
४१	अधिमानस्य पुरुषे प्रक्षेपः	११
४१	अष्टानवतिविधचयने विशेषः	१२

इति पञ्चमी कण्डिका ।

४२	वेदीष्टकावृद्धिकथनप्रतिज्ञा	१
४२	वेदिवर्द्धनप्रकारः	२–५
४६	अन्तःपात्य–गार्हपत्ययोर्न वृद्धिः	६
४७	यूपैकादशिन्यां वेदिवर्धनप्रकारः	८–१९

इति षष्ठी कण्डिका ।

४९	श्लोकशुल्बम्	१–२९

इति सप्तमी कण्डिका ।

श्रीगणेशाय नमः ।

सरलवृत्तिसहितम्

कात्यायन-शुल्बसूत्रम्

जगदम्बावलम्बाय निरालम्बाय शूलिने ।
जगत्त्रयकुटुम्बाय नमः साम्बाय शम्भवे ॥१॥
जनकं ज्ञानदं नत्वा प्रभुदत्ताग्निहोत्रिणम् ।
तदर्शितपथौ कुर्वे वृत्तिं शिशुविबोधिनीम् ॥२॥
श्रीमत्कात्यायनप्रोक्तशुल्बसूत्रं यथामति ।
व्याख्यातुमेष यत्नस्तत्प्रीयतां परमः पिता ॥३॥

रज्जुसमासं वक्ष्यामः ॥ १ ॥

रज्ज्वा (१) समस्यते सङ्क्षिप्यते यः प्रदेशः स रज्जुसमासः(२)।

---

(१) रज्जुलक्षणं श्लोकशुल्बे–

"अजीर्णा ग्रथिनी सूक्ष्मा समा श्लक्ष्णा त्वरोमशा ।
रज्जुर्मानाधिका कार्या अध्वरे योगमिच्छता ।
शाणी वा बाल्वजी चैव वैणवी वा विधीयते ।
रज्जुस्तूभयतःपाशा त्रिवृता यज्ञकर्मणि ।
रज्जुर्मुञ्जमयी कार्या शणैस्तु परिमिश्रिता ।
कात्यायनो वदत्येवमखोडा कुशबल्वजैः ।"

इति (श्लो. शु. १०-१२)। अखोडा = अरोमशा ।

(२) "रज्जुशब्देन तत्साध्यं क्षेत्रमुच्यते । समास एकीकरणम् । तेन यप्रमाणातुल्यप्रमाणानां क्षेत्राणामेकीकरणं वक्ष्यामः" इत्यर्थो गङ्गाधरभाष्ये । ोः समासः = सम्यगसनं क्षेत्रानुगुणतया धारणमिति वृत्तिः ।

समासो व्यासादेरप्युपलक्षकः (१)। रज्वा सङ्क्षिप्यते विस्तार्यते च यथा, (२) तं प्रकारं कथयिष्याम इति भावः ॥ १ ॥

आदौ दिक्साधनमाह—

समे शङ्कुं निखाय, शङ्कुसम्मितया रज्वा मण्डलं परिलिख्य, यत्र लेखयोः शङ्कुच्छाया निपतति तत्र शङ्कूं निहन्ति सा प्राची ॥ २ ॥

समे = मुकुरजठरवत्समीकृते देशे (३) शङ्कुं निखाय, (४) शङ्कुसम्मितया = शङ्कौ सम्यक् मितया (५) प्रक्षिप्तया धारितया रज्वा मण्डलं = वृत्तं परिलिख्य = कृत्वा, लेखयोः (६) मण्डलपूर्वापरदिग्गतयोर्लेखयोः यत्र = यस्मिन् प्रदेशे शङ्कोरग्रस्य छाया पूर्वार्द्धे पश्चिमरेखायां प्रविशति, अपरार्द्धे च पूर्वरेखायां निःसरति, तत्र =

---

(१) "समचतुरस्रं चिकीर्षन्" (३।४) इत्यादिना व्यासादिरपि वक्ष्यते, अतः समासग्रहणमेतच्छास्त्रप्रतिपाद्यसकलविषयस्योपलक्षणम् ।

(२) "वेणुना मिमीते" (आप. शु. ४ । १२) इति वेणोर्मानसाधनत्वे नाभिहितेऽपि इह रज्जूपादानमृजूत्वर्थम् । "नान्यत्सूत्राद्ऋजुर्भवेत्" (श्लो. शु. ३) इति वचनात्, "त्रिपुरुषां रज्जुं मित्वा" (का. श्रौ. १६।८।१) इति स्वसूत्राच्च ।

(३) समत्वं जलनैव संभाव्यम् । "न जलात्सममन्यत्स्यात्" (शुल्व. ३) इति वचनात् ।

(४) शङ्कुलक्षणम्—

"षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितम् ।
जरठं (दृढं) चाव्रणं चैव शङ्कुं कुर्याद्विचक्षणः ।" (श्लो. शु. ६)

तथा—

"एकतक्ष ऋजुस्तीक्ष्णः खादिरः सममायतः ।
शङ्कुः कार्यस्तु शुल्वज्ञैस्तस्यार्द्धं गमयेन्महीम् ।" (श्लो. शु. ८)

तथा—

"प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः ।
शङ्कुरामशिराः कार्यस्तस्याप्यर्द्धं निखापयेत् ।" इति (श्लो. शु. ९)। आमशिरा आर्द्रशिराः ।

(५) डुमिञ् प्रक्षेपे (५।४) इत्यस्य क्तान्तस्य प्रयोगः । यद्वा 'मा माने (२।५२) इत्यस्य प्रयोगः । तदा शङ्कुतुल्यया द्वादशाङ्गुलया रज्वेत्यर्थः ।

(६) मण्डले लेखैकत्वेऽपि लेखयोरिति द्विवचनं पूर्वापरदिगभिप्रायम् ।

स्थलद्वये एकैकं शङ्कुं (१) निखनेत्; तयोः शङ्कोरुपरि नीता रज्जुः प्राची = पूर्वापरा दिग्भवति । प्राक्शङ्कुः प्राची, पश्चिमशङ्कुः प्रतीची । प्राचीशब्दस्य ससम्बन्धिकत्वात् प्रतीच्यपि लक्ष्यते ॥ २ ॥

उदीचीसाधनमाह—

तदन्तरर्ठ० रज्ज्वाऽभ्यस्य, पाशौ कृत्वा, शङ्कोः पाशौ प्रतिमुच्य, दक्षिणाऽऽयम्य, मध्ये शङ्कुं निहन्त्येव-मुत्तरतः सोदीची ॥ ३ ॥

तयोः = निखातयोः शङ्कोरन्तरम् = अन्तरालम् अन्तरालमितां भुवं रज्ज्वा मित्वा, तां रज्जुम् अभ्यस्य = द्विगुणीकृत्य, द्विगुणीकृतरज्जोरन्तयोः पाशौ कृत्वा (२) तौ पाशौ शङ्कोः प्रक्षिप्य, द्विगुणीकृतरज्जुमध्यं कृतचिह्नं दक्षिणस्यां दिश्याकृष्य यत्र रज्जुमध्यमापतति, तत्र मध्ये मध्यचिन्हेन स्पृष्टे भूभागे शङ्कुं निहन्ति सा दक्षिणा दिक् । एवमुत्तरस्यां दिशि द्विगुणितरज्जुमाकृष्य मध्यभागे शङ्कुं निहन्ति मुद्गरेण, (३) सा उदीची दिग्भवति ॥ ३ ॥

क्षेत्रसाधनाय परिभाषामाह—

रज्ज्वन्तयोः पाशौ करोति ॥ ४ ॥

अन्यत्रापि क्षेत्रमानार्थं या रज्जुरुपादीयमाना भवेत्, तत्र सर्वत्रापि रज्जुमात्रे तस्या अन्तयोः पाशौ कुर्यान्नियमेन ॥ ४ ॥

---

(१) चिन्हेनाप्यर्थसिद्धेः शङ्कुनिखननं "तच्छङ्कुं निहन्ति" (श. ब्रा. ३।२।१।१) इति श्रुत्यनुरोधेन ।

(२) यथा रज्जोर्मानं न हीयते तथा पाशौ करणीयौ—

"यथा न क्षीयते मानं यथा च न विवर्द्धते ।
यथा च रमते दृष्टिस्तथा योगं समाचरेत् ।" (श्लो. शु. १९)

(३) मुद्गरलक्षणं च—

"चतुरस्रं मुद्गरं तत्षोडशाङ्गुलमायतम् ।
अविद्धं क्रमणीयं च दारुमध्याच्च निर्मितम् ।" (श्लो. शु. १०)

अविद्धं काष्ठान्तरेण । क्रमणीयं शङ्कुहननरूपक्रमणार्हम् ।

तथा—

"द्वितस्तिप्रमाणस्तु खादिरो मुद्गरस्तथा ।
शङ्कस्तेन निखातव्यस्तस्मात्तस्य परिग्रहः ।" (श्लो. शु. ७) इति ।

मानार्थं गृहीतायां रज्वां चिन्हस्थानान्याह—

श्रोण्यर्ठ०स-निरञ्छन-सङ्ख्यासमासभङ्गेषु लक्षणानि ॥ ५ ॥

वेद्यादेनर्ऋत्य-वायव्यकोणौ श्रोणी, आग्नेयैशानकोणावंसावुच्येते। निरञ्छनं वक्ष्यमाणलक्षणम् (१।१२)। सङ्ख्ययोः प्रमाणरज्ज्वभ्यासरज्ज्वोर्यः समासः = संयोग एकीकरणम्, तस्य भङ्गो = विभागः संख्यासमासभङ्गः। अर्थाद् द्विगुणरज्वा मध्ये यो बिन्दुः स एव सङ्ख्यासमासभङ्गपदवाच्यः। इष्टक्षेत्रायाममिता रज्जुः, तावत्परिमाणा द्वितीया रज्जुरभ्यासरज्जुरित्युच्यते। श्रोणी च अंसौ च निरञ्छनं च सङ्ख्यासमासभङ्गश्च, तेषु लक्षणानि = चिन्हानि कुर्यात्। अत्र श्रोण्यादिपदानि श्रोण्यादिमापकरज्जुपराणि। तेन क्षेत्रमानार्थं क्षेत्रद्विगुणां रज्जुमादाय तत्र श्रोणिचिह्नम्, अंसचिह्नं, निरञ्छनचिह्नं सङ्ख्यासमासभङ्गचिह्नं च कुर्यादित्यर्थः ॥ ५ ॥

प्राच्यन्तयोः शङ्कू निहन्ति ॥ ६ ॥

प्राची पूर्वा दिक्। अन्तः प्रतीची। प्राची च अन्तश्च प्राच्यन्तौ, तयोः शङ्कू निहन्यात्। इष्टक्षेत्रे यावती प्राची इष्यते, यथा—दर्शपौर्णमासवेदिः "त्र्यरत्नि प्राचीम्" (२।६।१) इत्यनेन त्र्यरत्निदीर्घा विहिता, यथा च ज्योतिष्टोवेदिः "पुरस्तात्षट्त्रिंऽशति" (८।३।८) इति षट्त्रिंशत्प्रक्रमदीर्घा विहिता, तत्र सर्वत्र तावत्याः पूर्वापरान्तयोः शङ्कू निखनेदिति भावः (१) ॥ ६ ॥

कोणेषु शङ्कुनिखननमाह—

श्रोण्यर्ठ०सयोश्च ॥ ७ ॥

श्रोणिद्वयेऽसद्वये च शङ्कू निखन्याद्वक्ष्यमाणविधिना। सर्वत्र क्षेत्रमापने कोणेषु शङ्कुनिखननमिति भावः ॥ ७ ॥

---

(१) "समे शङ्कुं निखाय" (१।२) इत्यादिना यत्प्राच्यन्तयोः शङ्कुनिखननमुक्तं तत्प्राचीसाधनार्थम्। अत्र पुनरन्यत्रापि इष्टक्षेत्रे प्राच्यन्तयोः शङ्कुद्वयं निखेयमित्येतदर्थमिदमुक्तम्। अतो न पुनरुक्तिः।

श्रोण्यंससाधनमाह—

शङ्कोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्वां दिशं० हरन्ति ॥ ८ ॥

"प्राच्यन्तयोः शङ्कू निहन्ति" (१।६) इत्यनेन यौ पूर्वापरौ शङ्कू निहतौ, तयोः शङ्कोर्द्विगुणिताया रज्ज्वा अन्तयोः कृतौ पाशौ प्रतिमुच्य वक्ष्यमाणलक्षणेन निरञ्छनसंज्ञकेन चिन्हेन रज्जुं गृहीत्वा आग्नेयीं दिशं प्रति आकर्षेत्, तत्रांसचिन्हे शङ्कुर्देयः। एवं कृते सति क्षेत्रप्रमाणतिर्यङ्मानीकं पादोनक्षेत्रप्रमाणपार्श्वमानीकं सपादक्षेत्रप्रमाणादण्यायाकं भवति क्षेत्रं समुत्पद्यते। इदं च भवति क्षेत्रसमुत्पादनमंससाधनार्थम्। प्रदर्शितपार्श्वमानीरूपायां रज्ज्वामेव अंससाधनार्थं शङ्कुं दद्यात् इति "प्रमाणार्द्धे समचतुरस्रस्य शङ्कुः" (१।१६) इत्यादिना स्वयमेव वक्ष्यति। अत्र निरञ्छनचिह्नमंसचिह्नसमीपवर्ति कर्त्तव्यम् (१) ॥ ८ ॥

एवमुत्तरतः ॥ ९ ॥

एवं = शङ्कोः पाशौ प्रतिमुच्य निरञ्छनेन रज्जुं गृहीत्वा उत्तरतः शङ्कून्यां रज्जुमाकृषेत्, तत्रोत्तरांसचिन्हेऽपरः शङ्कुर्देयः। अत्राप्युत्तरांससाधनाय पूर्ववत् भवति क्षेत्रमुत्पद्यते ॥ ९ ॥

विपर्यस्येतरतः ॥१०॥

इतरशब्देन क्षेत्रस्य पश्चिमप्रान्त उच्यते। विपर्यस्येत्यनेन रज्जुपाशयोर्विपर्यास उच्यते। तेनायमर्थः। इतरतः = पश्चिमभागे विपर्यस्य = रज्जुपाशौ परिवर्त्य पूर्वशङ्कुपाशं प्रतीचीशङ्कौ, प्रत्यक्पाशं च पूर्वशङ्कौ प्रक्षिप्य निरञ्छनेन नैर्ऋत्यकोणे रज्जुमाकृष्य तत्र शङ्कुर्देयः, सा दक्षिणा श्रोणिः। एवं वायव्यकोणे चाकृष्य शङ्कुर्देयः, सा उत्तरा श्रोणिः। एते शङ्वः प्राच्यन्तयोरित्यादिसूत्रद्वयेनोक्ताः (६-७)। तेन पूर्वोक्तप्रकारं भवति क्षेत्रमुत्पद्यते श्रोणिसाधनार्थम्। पाशविपर्यासेन निरञ्छनचिह्नं प्रत्यक्श्रोणिचिह्नसमीपवर्ति भवति ॥१०॥

---

१) महति क्षेत्रे एकेन रज्जुप्रसारणस्य कर्तुमशक्यत्वाद्धरन्तीति (मूले) बहुवचनम्।

अथवा (१) प्रमाणस्य = इष्टक्षेत्रायामप्रमाणरज्ज्वा अर्द्धं प्रमाण भ्यस्य = द्विगुणीकृत्य प्रमाणरज्ज्वां वर्द्धयित्वा अभ्यस्तरज्जुं षोढा विभज्य प्रमाणरज्जुसंलग्ने षष्ठेऽशे चिन्हं करोति, तन्निरञ्छनम् । था—सोमयागे षट्त्रिंशद्धस्तदीर्घा महावेदिः, तत्र प्रमाणरज्जुः ट्त्रिंशद्धस्तदीर्घा, तदर्धमष्टादश, तत्राष्टादशहस्तवृद्धौ चतुष्पञ्चा द्धस्तमिता रज्जुः सम्पद्यते, तत्राभ्यस्तरज्जौ षोढा विभक्तायां स्तत्रयात्मक एकैको भागो भवति, तत्र षष्ठेऽशे चिन्हे दीयमाने नचत्वारिंशद्धस्तेषु चिह्नं भवति, तन्निरञ्छनम् । पञ्चदशहस्ता मकाः पञ्च भागा अवशिष्टा भवन्ति । अत्रापि प्रमाणरज्जुः षट्त्रिंश स्तदीर्घा, तिर्यङ्मानी रज्जुः पञ्चदशहस्तदीर्घा, अक्षण्यारज्जु कोनत्रिंशद्धस्तदीर्घेति बोध्यम् ॥१४॥

अक्षण्या तिर्यङ्मानीशेषः ॥१५॥

पूर्वोक्तायां चतुःपञ्चाशद्धस्तदीर्घायां रज्ज्वां पञ्चदशहस्ता रज्जु स्तिर्यङ्मानी । तस्याः शेषः = एकोनचत्वारिंशद्धस्तदीर्घा रज्जुः क्षण्या इत्युच्यते ॥१५॥

समचतुरस्रस्य श्रोण्यंसस्थानमाह—

प्रमाणार्द्धे समचतुरस्रस्य शङ्कुः ॥१६॥

अभीप्सितस्य समचतुरस्रस्य = क्षेत्रस्य यत् प्रमाणम् = आयामः, तस्यार्द्धे (श्रोण्यंसपरिच्छेदाय) शङ्कुर्देयः, स चाभ्या तरज्जोरर्द्धे देयः । यथा—हस्तमिते क्षेत्रे हस्तार्द्धे इति । समास्तुल्याश्च त्वारोऽस्रयः कोणा यस्य तत्समचतुरस्रम् ॥ १६ ॥

दीर्घचतुरस्रस्य श्रोण्यंससाधनमाह—

शास्त्रवदर्धे दीर्घचतुरस्रस्य ॥१७॥

---

(१) "वाशब्दो दीर्घचतुरस्र-विषमदीर्घचतुरस्रयोरेव विकल्पावबोधको, न चतुरस्रस्यापि, असंभवात् । अत्रोदाहरणेनैव व्याख्या । यथा—द्वादशाङ्गुलायामे षडङ्गुलविस्तारमिते दीर्घचतुरस्रे द्वादशाङ्गुलायामप्रमाणार्द्धे षडङ्गुलानि, तान्य भ्यस्य वर्द्धयित्वा, तस्य षडङ्गुलमिताभ्यासस्य षष्ठेऽशे प्रमाणरज्जुसन्निकृष्टाभ्यास षष्ठांशे सङ्ख्यासमासभङ्गादेकाङ्गुले पाशात्पञ्चमाङ्गुले इत्यर्थः" इति गङ्गा धरमाष्ये ।

दीर्घचतुरस्रस्य क्षेत्रस्य यावान् विस्तारः शास्त्रे उक्तः, तदर्धं तिर्यङ्मानचिह्नं रज्ज्वां कुर्यात्। यथा—ज्योतिष्टोमे महावेद्याः श्रोणिः त्रिंशद्धस्ता त्रयस्त्रिंशद्धस्ता वा विहिता (का. श्रौ. ८।२।६–१०)। तत्र त्रिंशद्धस्तपक्षे सार्द्धषोडशसु हस्तेषु चिन्हं कृत्वा तत्र शङ्कुं निखन्यात्। दीर्घचतुरस्रे विस्तारस्यानियतत्वादिदमुक्तम् ॥ १७ ॥

शकटमुखस्य चैवम् ॥१८॥

सचयने सोमयागे शकटमुखाकृतिं त्र्यस्रां चितिं विकल्पेन वक्ष्यति, (४।५) सैव चितिः शकटमुखशब्देनोच्यते। चयनयागे शकटमुखाकारस्य त्र्यस्रिक्षेत्रस्य शास्त्रोक्तविस्तारार्द्धे श्रोण्यर्थं शङ्कुं दद्यात्। इदं च चिन्हं श्रोणिसाधनाय, त्र्यस्रिक्षेत्रैऽसाभावात् ॥ १८ ॥

एतेन प्राग्वर्ठंश-वेदिमानानि व्याख्यातानि ॥ १९ ॥

एतेन समचतुरस्र-दीर्घचतुरस्र-त्र्यस्रिक्षेत्रसाधनेन प्राग्वंशानां हविर्द्धानादिमण्डपानां वेदीनां च मानानि व्याख्यातानि = उक्तानि बोद्धव्यानि, अर्थात् तेषामप्यर्द्धे शङ्कुर्देयः। प्राक् = प्रागग्रो वंशः = पृष्ठवंशः = मध्यबलो यस्य मण्डपादेः स प्रागग्रः। (यस्य वंशस्योपरि दक्षिणत उत्तरतश्च वंशाः प्रोता भवन्ति स मध्यमो वंशः पृष्ठवंश इत्युच्यते) तत्र सोमयागे पत्नीशाला, विमितं, हविर्द्धानमण्डपः, आग्नीध्रमण्डपः, मार्जालीयमण्डपश्चेत्येते प्राग्वंशा भवन्ति। तत्र पत्नीशाला-ऽऽग्नीध्र-मार्जलीयाः पञ्चहस्तमिताः, तदर्धं सार्द्धहस्तद्वयात्मकं, तत्र शङ्कुः। विमितं (१) दशारत्निदीर्घम्, तदर्धे शङ्कुः। हविर्धानमण्डपो दशहस्तदीर्घः, तदर्धे शङ्कुः। वेदिश्च। ऐष्टिकी, सौमिकी, वारुणप्रघासिकी च। ऐष्टिकी वेदिरुभयरत्निदीर्घा, सौमिकी षट्त्रिंशदरत्निदीर्घा, वारुणप्रघासिकी सप्तारत्निदीर्घा षड्रत्निदीर्घा वा। तदर्धे शङ्कुः ॥ १९ ॥

शालामानं च ॥२०॥

ज्योतिष्टोमे "शालां वा" (७।१।१९) इति सूत्रेण विमितेन सह शाला विकल्प्यते। तस्याः शालाया मानं च दीर्घचतुरस्ररज्जुकथनेन व्याख्यातम्। शाला च—

(१) "विमितं चतुरस्रं स्याद्दशारत्निप्रमाणतः" इति निगमपरिशिष्टम्।

"विंशत्यरत्निः शाला स्यात्तदर्धेन तु विस्तृता" (निग. प.) इति दीर्घचतुरस्रा भवति, तदर्धे शङ्कुः । इयमपि प्राग्वंशा ार्या ॥२०॥

तत्रोदीची प्राचीवत् ॥ २१ ॥

"उदीचीनवर्ठ०शामेव शालां मिन्वन्ति" इति सत्रेषूदीचीनवंशा ाला विहिता । तत्रोदीची प्राचीत्वेन व्यवहर्तव्या । "प्राच्यन्तयोः ङ्कू निहन्ति" (१।६) इत्यादि यदुक्तं, तदुदीच्यां कर्तव्यमित्यर्थः । ालाया उदगायतत्वादादावुदगग्ररज्जुन्यासं कृत्वा शङ्कुं निहत्य श्चात्तिर्यङ्मानं साध्यमिति यावत् । सत्रेषु ससप्ततिशतारत्निदीर्घा ाला विहिता, तदर्धं पञ्चाशीतिरत्नयः, तत्र शङ्कुः ॥ २१ ॥

सदसश्चैवम् ॥२२॥

सोमयागे सदोऽभिधानो मण्डपोऽष्टादशारत्निदीर्घो नवारत्नि- ास्तृतो दीर्घचतुरस्र उदग्वंशो विहितः (का. श्रौ ८।६।३) । तत्रापि ालावत् उदीची प्राचीत्वेन व्यवहर्तव्या । सदोमण्डपस्य दैर्घ्ये ास्तारे चान्येऽपि पक्षाः सन्ति, ते तत एवावगन्तव्याः (का. श्रौ. ।६।६) ॥ २२ ॥

परिभाषामाह—

अपरिमितं प्रमाणाद् भूयः ॥२३॥

यत्र सूत्रकृता अपरिमितशब्दः प्रयुक्तः, यथा—वरुणप्रघासे ादिमुपक्रम्य "अपरिमिता वा" (का. श्रौ. ५।३।१४) इति, यथा ा दीक्षासु "द्वादश दीक्षा अपरिमिता वा" (७।१।२४) इत्यादौ, त्र सर्वत्र प्रमाणात् = उक्तमानात् भूयः अधिकं मानं ग्राह्यम् । अपरि- मितशब्दः पूर्वोक्तप्रमाणादधिकप्रमाणे रूढोऽवगन्तव्यो, न तु न रिमिता अपरिमिता इति नञ् समासेन विगृह्य प्रमाणाभाववाचक त्यर्थः (१) । अधिकप्रमाणता च एकेनैव सम्पादनीया, न तु द्वित्रा

(१) अपमितां वेति यदिष्टिवेदावुक्तम्, (२।६।१) अपरिमितेष्टक इति च ाचयनेऽप्युक्तम्, (१७।७।२८) एतद् द्वयं विना उक्तमानाधिकत्वाची अपरिमित- ाब्दः । इष्टिवेद्यां चयने च मानाभावार्थोऽपरिमितशब्दः ।

दिना, अनवस्थाप्रसङ्गात्। तेन "द्वादशदीक्षा अपरिमिता वा" इत्यत्र त्रयोदश दीक्षा अपरिमितशब्दार्थः। एवं सर्वत्रोह्यम् ॥२३॥

एवं सर्वत्र प्राप्तौ व्यवस्थामाह—

प्रमाणे शास्त्रं प्रमाणं निर्ह्रासविवृद्ध्योः ॥ २४ ॥

प्रमाणे = मानेऽपेक्षिते (शुल्व) शास्त्रमेव प्रमाणं नान्यत्।

यथा—"पञ्चारत्निः पञ्चदशपर्यन्तः सोमे" (का. श्रौ. ६।१।२६) इत्यादिना यूपस्यारत्निना परिमाणमुक्तं ज्योतिष्टोमे, अश्वमेधे च "एकविर्ठ०शतिरश्वमेधे" (का. श्रौ. ६।१३२) इति, अत्र यूपपरिमाणस्य वृद्धौ ह्रासे च शास्त्रोक्ते एव ह्रासवृद्धी ग्राह्ये, न स्वेच्छया। यथा वाऽष्टविधादिचयने पुरुषमात्राभ्युच्चयेन वृद्धिः। यथा च सौत्रामणीवेद्यां सौमिकीवेदीतो ह्रासः। अयं च ह्रासः प्रक्रमतृतीयमानेनैव कार्य इति वक्ष्यते (२।१५) ॥ २४ ॥

योगश्च ॥ २५ ॥

योगो नाम युक्तिः, साऽप्याश्रयणीया। युक्त्या ह्रासवृद्धी विधेये, नाधिकन्यूने (१) ॥ २५ ॥

दक्षिणाग्निस्थानमाह सूत्रयुग्मेन—

इतरस्य वितृतीये दक्षिणत इत्येतद्व्याख्यामः ॥२६॥

"इतरस्य वितृतीये दक्षिणतः" (का०श्रौ० ४।८।१८) इति दक्षिणाग्निं प्रकृत्योक्तम्, तद् विविच्य वक्ष्यामः। अग्निहोत्रशालायां पश्चिमभागे गार्हपत्यस्थानं सार्द्धत्रयोदशाङ्गुलकर्कटकभ्रामणेन वृत्तं (२) निर्माय तन्मध्यात् पुरस्तात् एकादशप्रक्रमव्यव-

---

(१) अत एव चतुर्भागादिवृद्दृत्यन्तानामिष्टकानां न तुल्यो ह्रासः। तत्र योगो युक्तिरेव प्रमाणम्। अत एव देवयाज्ञिकैरिष्टकानिर्माणपद्धतौ पुरुषे पुरुषद्वात्रिंशांशं वर्द्धयित्वा तत इष्टकायन्त्रनिर्माणमभिहितम्।

(२) "परिमण्डलधिष्ण्यं गार्हपत्यस्य, चतुरस्रमाहवनीयस्य। अर्द्धचन्द्र इव दक्षिणाग्नेः, सभ्यावसथ्ययोर्गार्हपत्यवत्" इति (निग० प०)। कर्काचार्यास्तु "अश्व्यन्वाधानमध्वर्युर्यजमानो वा" (२।१।२) इति सूत्रे आहवनीयप्रमाणं बाहुपरिमितमाहुः।

ा(१) द्वादशप्रक्रमव्यवहिते वा देशे आहवनीयमध्यं कल्पयेत्। आह-
ीयश्च चतुर्विंशत्यङ्गुलसमचतुरस्रः। एवमश्यायतनद्वयमुक्त्वा पश्चा-
दमुक्तम् "इतरस्य वितृतीये दक्षिणतः" (का. श्रौ. ४।८।१८)
ा। इतरस्य दक्षिणाग्नेः स्थानं गार्हपत्यस्य पुरस्ताद् वितृतीये दक्षि-
ाः कर्तव्यमिति तदर्थः। तं वितृतीयार्थं विविच्य वक्ष्यामः ॥२६॥

प्रतिज्ञातमाह—

ार्हपत्याहवनीययोरन्तरर्ठ० षड्धा सप्तधा वाऽऽगन्तुसमं त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणाऽऽग्नेय तस्मिन्नग्निः ॥ २७ ॥

गार्हपत्यश्चाहवनीयश्च गार्हपत्याहवनीयौ। तयोरन्तरम्=न्तरालम्, तच्च अष्टौ, एकादश द्वादश वा प्रक्रमाः। (प्रक्रमो द्वाद-शाङ्गुलः) तदन्तरालं क्रमेण चतुः-पञ्च-षड्रस्तात्मकम्, तन्मितां रज्जु-मादाय, तां च षड्धा सप्तधा वा कृत्वा, उभयत्रापि आगन्तुसमम्=ागन्तुना-वर्द्धितभागेन समं=सह यथा तथा, अर्थात् षड्धापक्षे ष्ठं भागं विवर्ध्य, सप्तधापक्षे सप्तमं भागं विवर्द्ध्य वर्द्धितभागसहि-तां तां मध्यरज्जुं त्रेधा विभज्य=त्रिभागां कृत्वा, तत्र तृतीये तृतीये ागे चिह्नं कृत्वा अपरवितृतीयलक्षणेन=अपरे पश्चिमे भागे तृतीये यत् लक्षणं चिन्हं तद् धृत्वा, रज्जुप्रान्तपाशौ गार्हपत्याहव-नीयमध्यस्थितशङ्कोर्निधायापरवितृतीयचिन्हं दक्षिणा=दक्षिणस्यां दिश्याकृष्य=तस्मिन्नग्निः, आकृष्टतृतीयभागचिन्हस्पृष्टे भूभागे दक्षिणाग्निः, दक्षिणाग्नेर्मध्यशङ्कुरित्यर्थः ॥ २७ ॥

उत्करस्थानमाह—

विपर्यस्योत्तरत उत्करः ॥ २८ ॥

विपर्यासः पाशयोः, उत्तरत आकर्षः। तेनायमर्थः। विपर्यस्य=षोढा सप्तधा वा विभक्तागन्तुभागसहितवर्द्धितत्रिभागचिन्हितरज्जु-पाशौ विपरीतौ कृत्वा पूर्वतृतीयभागचिन्हमुद्गाकृष्य गार्हपत्याह-

(१) प्रक्रमो द्वादशाङ्गुलः—
"आधाने पदिकं कुर्यात्सोमे तु द्विपदो भवेत्।
अग्नौ तु त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः।" (श्लो० शु० ३४)

वनीययोरन्तरालमितां रज्जुं षड्धा सप्तधा वा कृत्वा तावन्तमपरं भागं संवर्द्ध्य त्रेधा विभज्य आहवनीयसन्निकृष्टतृतीयभागकृतचिन्हेनोदगाकृष्य तच्चिह्नस्पृष्टभूभागे उत्करः कार्यः, उत्करमध्यं कार्यमित्यर्थः। परिसमूहिततृणधूलिपुञ्ज उत्करः, तत्स्थानं कार्यम्। तच्च त्र्यङ्गुलकर्कटकभ्रामणेन वृत्तमेकाङ्गुलगर्त्तवच्च कार्यम् ॥२८॥

पक्षान्तरमाह—

अपि वाऽन्तरत्रिभागोनया रज्ज्वा पूर्वार्द्धे समं चतुरस्रं कृत्वा श्रोण्यामग्निः ॥ २९ ॥

अपि वा = अथवा अन्तरे = गार्हपत्याहवनीययोर्मध्ये या रज्जुः, सा त्रिभागेन स्वतृतीयांशेन ऊना कार्या। तया च करण्या आहवनीयमध्यात्प्रत्यक् समचतुरस्रं कर्त्तव्यम्। तस्य चतुरस्रस्य श्रोण्यां = दक्षिणश्रोण्यामग्निः = दक्षिणाग्निः कार्यः, तन्मध्यं कार्यमित्यर्थः।

अत्राष्टप्रक्रमाधानपक्षे प्रक्रमस्य च पादमात्रत्वकरणे दक्षिणाग्निखरस्य अर्द्धचन्द्राकृतेररत्निमात्रस्य परिशिष्टोक्तस्य पूर्वाग्रं वेदिमध्ये पततीति गार्हपत्यखरपूर्वभागादृष्टसु पादेषु आहवनीयखरपश्चिमभागः कर्त्तव्यः। एकादश-द्वादशपरिमितप्रक्रमपक्षे तु गार्हपत्याहवनीययोरन्तरमेव तावन्मातव्यम् ॥ २९ ॥

विपर्यस्योत्तरांसे उत्करः ॥ ३० ॥

विपर्यस्य = वैपरीत्येन चतुरस्रं कृत्वा तस्य चतुरस्रस्योत्तरांसे उत्करः कार्यः। विपर्यासवचनात्पश्चिमार्द्धे गार्हपत्यमध्यात्पुरस्तादग्निद्वयान्तरालमितरज्ज्वा स्वत्रिभागोनया करण्या चतुरस्रं कर्त्तव्यं, तदुत्तरांसे चोत्करः कार्यः ॥ ३० ॥

इति प्रथमा कण्डिका ॥ १ ॥

चातुर्मास्ययागे वरुणप्रघासाख्ये द्वितीयपर्वणि दक्षिणोत्तरे द्वे वेदी भवतः, तत्र दक्षिणा प्रतिस्थातुः, उत्तरा अध्वर्योः (का. श्रौ. ५।४।३२)। तत्र उत्तरवेदेः प्रमाणं "रथमात्र्युत्तरा" इति (का. श्रौ. सू. ५।३।११) रथात्मकमुक्तम्। रथमानं च तत्र नोक्तम्। अत आह—

अङ्गुलै रथसम्मितायाः प्रमाणम् ॥ १ ॥

वरुणप्रघासपर्वणि रथसम्मिताया उत्तरवेदेः प्रमाणमङ्गुलैः
ा वक्ष्याम इति सूत्रशेषः ॥ १ ॥

तत्राष्टाशीतिशतमीषा ॥ २ ॥

रथे प्रागपरायतः काष्ठविशेष ईषा । अत्र ईषाशब्देन वेदेः पूर्वा-
ायामो लक्ष्यते । तेन वरुणप्रघासपर्वणि उत्तरवेदेः पूर्वपश्चिमा-
यः अष्टाशीत्यधिकशताङ्गुलपरिमितो भवतीति सूत्रार्थः । चतुरङ्गु-
यूनाष्टहस्तमिति यावत् ॥ २ ॥

चतुःशतमक्षः ॥ ३ ॥

रथस्य पश्चाद्भागे तिर्यग्गतं काष्ठमक्षशब्देनोच्यते । अत्र अक्ष-
ब्देन वेदेः श्रोणिप्रदेशो लक्ष्यते । अतश्च वरुणप्रघासीयोत्तरवेदेः
ाद्भागः चतुरङ्गुलाधिकशताङ्गुलमितो भवतीति सूत्रार्थः । अष्टाङ्गुला-
कं हस्तचतुष्टयमित्यर्थः ॥ ३ ॥

षडशीतिर्युगम् ॥ ४ ॥

वृषस्कन्धोपरि दीयमानं काष्ठं युगशब्देनोच्यते । अत्र युगशब्देन
ाः पूर्वभागो लक्ष्यते । तेन वारुणप्रघासिक्या उत्तरवेदेः पूर्वभागः
डशीत्यङ्गुलो भवति, दशाङ्गुलोनाश्चत्वारो हस्ता इत्यर्थः । एवं
ारेण रथमात्री वेदिः साधनीया । पक्षान्तराण्यपि कातीयश्रौत-
त्रोक्तानि (अ. ५ कं. ३ सू. २६) बोध्यानि ॥ ४ ॥

वरुणप्रघासे आहवनीयस्थानापन्ना उत्तरवेदिः "शम्यामात्रीम्"
का. श्रौ. सू. अ. ५ कं. ३ सू. २६) इति शम्यामात्री उक्ता । शम्या
माणं च तत्र नोक्तं, तदत्राह—

चत्वारोऽष्टकाः शम्या ॥ ५ ॥

चतुर्गुणिता अष्टसङ्ख्या द्वात्रिंशद्भवति । तेन द्वात्रिंशदङ्गुला
अष्टाङ्गुलाधिकहस्तमिता) शम्या भवतीति सूत्रार्थः । शम्याशब्देन
गच्छिद्रप्रवेश्यं काष्ठं रथाङ्गमुच्यते । इह वेदिमानकृत्काष्ठं लक्ष्यते ॥५॥

पितृमेधे 'दिक्स्रक्ति (१) पुरुषमात्रं मिमीते" इत्युक्तम् (का. श्रौ.

---

(१) दिक्षु स्रक्तयः कोणा यस्य तत् दिक्स्रक्ति, दिक्कोणं चतुरस्रमित्यर्थः ।

सू. २१।२।८)। अत्र ग्रन्थे विदिक्स्रक्तेः समचतुरस्रस्य प्रकार उक्तः (१।१६)। इदानीं दिक्स्रक्तिताकरणार्थमिदमाह—

पैतृक्यां द्विपुरुषं चतुरस्रं कृत्वा करणीमध्येषु शङ्कवः स समाधिः ॥ ६ ॥

पैतृक्यां = पितृमेधवेदौ विंशतिशताङ्गुलकपुरुषमितसमचतुरस्रस्य क्षेत्रस्य अक्ष्णयारज्वा द्विपुरुषक्षेत्रफलकं समचतुरस्रं तिलन्यूनसप्ततिशताङ्गुलमितं कृत्वा तस्य पार्श्वमानीद्वय-तिर्यङ्मानीद्वयरूपाणां दिक्चतुष्टयगतानां चतसृणां करणीनां मध्येषु शङ्कुचतुष्टयं दद्यात्, सूत्रचतुष्टयं च पातयेत्, तद्विग्गतकोणकं पुरुषमात्रं समचतुरस्रं भवति, स समाधिः = क्षेत्रमापनमित्यर्थः। कथं दिक्स्रक्तिता स्यादित्याक्षेपे ह्येवं समाधानं भवतीत्यर्थः।

विंशतिशताङ्गुलः पुरुषः। पुरुषक्षेत्रफलकं चतुरस्रं १४४०० अङ्गुलमिताभिः करणीभिर्निष्पद्यते। तस्य चतुरस्र द्वे रेखे पार्श्वमानीशब्दाभिधेये, द्वे च तिर्यङ्मानीशब्दाभिधेये। मध्ये एका तिर्यग्दत्ता रज्जुः अक्ष्णया (कर्ण) शब्दाभिधेया। तत्प्रमाणया अक्ष्णया रज्वा यच्चतुरस्रमुत्पद्यते तद् द्विपुरुषक्षेत्रफलकं भवति। तच्च चतुरस्रं दिक्कोणकं सम्पाद्यमिति ॥६॥

अत्र ग्रन्थे व्यवहारार्थं पञ्च रज्जुसंज्ञा आह—

करणी, तत्करणी, तिर्यङ्मानी, पार्श्वमान्यक्ष्णया चेति पञ्च रज्जवः ॥ ७ ॥

करणी, तत्करणी, तिर्यङ्मानी, पार्श्वमानी, अक्ष्णया, एताः पञ्च रज्जूनां संज्ञाः। क्रियते क्षेत्रं निष्पाद्यते अनया सा करणी, प्राचीसूत्ररूपा मध्यरज्जुः, समचतुरस्रे प्राचीमध्यरेखामिता रज्जुः प्रमाणरज्जुः करणी नाम। तदिति क्षेत्रद्वैगुण्यत्रैगुण्यादि सामान्येनोच्यते। तेन तत् क्षेत्रद्वैगुण्यादि क्रियतेऽनया सा तत्करणी, द्विकरणी, त्रिकरणी चतुष्करणी इत्यादि। ततश्च द्वे क्षेत्रे समस्य एकत्र करोति सा द्विकरणी। एवं त्रिकरणी-चतुष्करण्यादयः। तिर्यक एयंसस्वरूपं मीयतेऽनया सा तिर्यङ्मानी। प्राच्यन्तयोस्तिर्यग्वर्तमानं रज्जुद्वयमक्षिवत् क्षेत्रं नयति इत्यक्ष्णया कर्णसूत्रं तिर्यग्दत्ता मध्यरज्जुः। तस्यां दत्तायां चतुरस्रमक्षिद्वयसदृशं भवति ॥७॥

सोमयागे—"यजमानदशपद्यां वा" (५।३।) इत्यनेन दशपदा उत्तरवेदिर्भवतीत्युक्तम् । अत्र तस्या वेदेः करणीमाह—

पदं तिर्यङ्मानी, त्रिपदा पार्श्वमानी, तस्याश्चणया-रज्जुर्दशकरणी ॥ ८ ॥

यस्य क्षेत्रस्य तिर्यङ्मानी = दक्षिणोत्तरायता रज्जुः पदम् = एकपदपरिमिता अर्थाद् द्वादशाङ्गुलप्रमाणा भवति, पार्श्वमानी च त्रिपदा = पदत्रयपरिमिता सार्द्धहस्तायता भवति, तस्याश्चणयारज्जुः दशकरणी = दशपदक्षेत्रफलकस्य चतुरस्रस्य करणी = निष्पादिका किञ्चिदधिकषट्त्रिंशदङ्गुलरूपा भवति, तस्याश्चणयारज्ज्वा दशपद-फलकं क्षेत्रं निष्पाद्यत इत्यर्थः ॥८॥

अग्नौ चत्वारिंशत्पदा उत्तरवेदिर्विहिता, तत्साधनमाह—

द्विपदा तिर्यङ्मानी, षट्पदा पार्श्वमानी, तस्याश्चणया रज्जुश्चत्वारिंशत्करणी ॥ ९ ॥

यस्मिन् क्षेत्रे तिर्यङ्मानी = दक्षिणोत्तरा रज्जुर्द्विपदा, पार्श्वमा-नी = प्रागायतं सूत्रं च षट्पदा, तस्याश्चणयारज्जुः = कोणसूत्रं च-त्वारिंशत्करणी = चत्वारिंशत्पदक्षेत्रफलकस्य चतुरस्रस्य साधिका सप्तत्र्यंशपदषट्कमिता भवति, तया रज्ज्वा निष्पादितं क्षेत्रं चत्वा-रिंशत्पदफलकं भवतीत्यर्थः ॥ ९ ॥

उत्तरवेदिः षड्विधा—शम्यामात्री, वितृतीया, अपरिमिता, युगमात्री, दशपदा, चत्वारिंशत्पदा चेति । तत्राद्ये वेदी उक्ते २।८–९।वितृतीया चोत्तरवेदिर्वेदेः क्षेत्रफलतृतीयांशेन भवति । अपरि-मिता च "अपरितं प्रमाणाद् भूयः" (का० शु० १।२३) इत्यनेनावगता । शम्यामात्री युगमात्री चेत्यवशिष्टं (१) वेदिद्वयप्रमाणं "षडशीति-र्युगम्, चत्वारोऽष्टकाः शम्या" (का०शु० २।४-५) इति सूत्राभ्यां रथमात्रीवेदीप्रसङ्ग एवोक्तमित्याह—

उपदिष्टं युगप्रमाणं० शम्याप्रमाणं च दर्शनात् ॥ १० ॥

---

(१) सोमे चयने च युगमात्री उत्तरवेदिः श्रूयते, (५।३।३०) शम्यामात्री च वरुणप्रघासे (५।३।२९) ।

युगप्रमाण–शस्याप्रमाणयोर्वेद्योः श्रुतौ दर्शनात् तत्प्रमाणं पूर्वमुपदिष्टम् (२।४–५) ॥ १० ॥

क्षेत्रमापनार्थं किंचिदाह—

दीर्घचतुरस्रस्याक्ष्णया रज्जुस्तिर्यङ्मानी पार्श्वमानी च यत्पृथग्भूते कुरुतस्तदुभयं करोतीति क्षेत्रज्ञानम् ॥११॥

दीर्घचतुरस्रस्य क्षेत्रस्य या तिर्यङ्मानी, साऽन्यत्र करणीत्वेन पृथग्भूता सती यत्प्रमाणकं समचतुरस्रं करोति, तथा दीर्घचतुरस्रस्य क्षेत्रस्य या पार्श्वमानी साऽन्यत्र करणीत्वेन पृथग्भूता सती यत्प्रमाणकं समचतुरस्रं करोति, तदुभयमपि मिलितं दीर्घचतुरस्रस्याक्ष्णया रज्जुः करोति इति क्षेत्रज्ञानं = क्षेत्रमानप्रकारो ज्ञातव्यः (१) ॥ ११ ॥

अथ द्वैगुण्यादिक्षेत्रप्रकारमाह—

समचतुरस्रस्याक्ष्णया रज्जुर्द्विकरणी ॥ १२ ॥

समचतुरस्रस्य क्षेत्रस्य याऽक्ष्णया = कर्णसूत्रभूता रज्जुः, सा द्विकरणी = द्विगुणक्षेत्रस्य प्राचीसूत्रप्रमाणमित्यर्थः (२) ॥१२॥

---

(१) यथा–"पदं तिर्यङ्मानी, त्रिपदा पार्श्वमानी, तस्याक्ष्णया रज्जुर्दशकरणीति दीर्घचतुरस्रमुक्तम् । तत्र पदप्रमाणा तिर्यङ्मानी पदक्षेत्रफलकं चतुरस्रं करोति, पार्श्वमानी तु त्रिपदा, सा च नवपदक्षेत्रफलकं चतुरस्रं करोति, एवमुभयं मिलित्वा दशपदक्षेत्रफलकं चतुरस्रं जातं, तच्च दीर्घचतुरस्रस्य पदमात्रतिर्यङ्मानी–त्रिपदपार्श्वमानीभ्यां जातस्याक्ष्णयारज्जुरेव करोतीति ज्ञेयम् । तिर्यङ्मान्याः पार्श्वमान्याश्च वर्गौ कृत्वा तावेकीकृत्य तस्य मूले समानीते दीर्घचतुरस्रस्य कर्णसूत्रमानमेव भवति" इति महीधरः ।

(२)—यथा—"हस्तमात्रे समचतुरस्रे चतुर्विंशत्यङ्गुलमिता प्रमाणरज्जुः, ततश्चतुर्विंशत्या चतुर्विंशत्या गुणिता षट्सप्तत्यधिका पञ्चशती भवति, सा द्विगुणिता द्वापञ्चाशदधिकैकादशशती, तस्या मूलं किंचिन्न्यूनचतुस्त्रिंशदङ्गुलानि, तान्येव द्विहस्तसमचतुरस्रस्य मानम्"इति महीधरः । त्रिहस्तादौ एकहस्तवर्गं त्रिगुणादिं कृत्वा तत्तन्मूलानयनेन तत्तदायामप्रमाणं बोध्यम् । यथा–त्रिहस्ते ४१ अङ्गुलानि ५ यवा इति ।

द्विकरणीसाधने प्रकारान्तरमाह—

रणीं तृतीयेन वर्धयेत्तच्च स्वचतुर्थेनात्मचतुस्त्रिंठ०शोनेन सविशेष इति विशेषः ॥ १३ ॥

करणीं = क्षेत्रायामं तृतीयेन = स्वतृतीयांशेन वर्धयेत्, तदिति मान्ये नपुंसकम्। तत् = तं तृतीयांशं स्वचतुर्थेन = स्वस्य तृतीयांशस्य यश्चतुर्थो भागः, तेन वर्धयेत्। किं भूतेन स्वचतुर्थेन, आत्मचतुस्त्रिंशोनेन = आत्मनः = चतुर्थांशस्य यश्चतुस्त्रिंशो भागः, तेन ऊनेन = हीनेन रहितेन, अर्थात् स्वचतुस्त्रिंशांशहीनचतुर्थभागेन तृतीयांशं वर्धयेत्। सविशेषो = भेदकः, करणी-द्विकरण्योरिति विशेषः। द्विकरणीसाधकं प्रकारान्तरमित्यर्थः (१) ॥ १३ ॥

त्रिकरणीसाधनमाह—

माणं तिर्यग्द्विकरण्यायामस्तस्याक्षण्यारज्जुस्त्रिकरणी॥१४॥

त्रिगुणीकर्तुमिष्टस्य क्षेत्रस्य करणी प्रमाणशब्देनोच्यते। प्रमाणं = त्रिगुणीकर्तुमिष्टस्य क्षेत्रस्य करणीरूपं, तिर्यक् = तिर्यङ्मानीत्वेन ज्ञार्थं, द्विकरणी = पूर्वोक्तं द्विकरणीमानम् एकहस्तस्याक्षण्यारूपम्

---

(१) अत्र रामवाजपेयिनः। "यथा—द्वादशाङ्गुलकरणीकं समचतुरस्रं द्विगुणीकर्तुमिष्यते, तस्य करणी तृतीयांशेन वर्द्धितषोडशाङ्गुला भवति। स च तृतीयोंऽशश्चतुरङ्गुलात्मकः स्वकीयतुरीयांशेनाङ्गुलेन स्वचतुस्त्रिंशभागेन वर्द्धनीयः। अत्राङ्गुलस्य ग्रहदेशमिताश्चतुस्त्रिंशत्तिला अवयवाः कथ्यन्ते। तत्र तिलोनसप्तदशाङ्गुला द्विकरणी भवति। या पूर्वं समचतुरस्रत्वाक्षण्या द्विकरणी उक्ता, सा कियती वतीति स्वरूपज्ञापनार्थमिदं सूत्रम्" इति।

महीधरः। "यथा—हस्तमितसमचतुरस्रस्य करणी चतुर्विंशत्यङ्गुलरूपा। सा द्विगुणीक्रियते यदा, तदा तां तृतीयांशेन वर्धयेत्। चतुर्विंशतेस्तृतीयांशोऽष्टावङ्गुलानि, एवं द्वात्रिंशदङ्गुलानि जातानि। स तृतीयांशोऽष्टाङ्गुलात्मकः स्वचतुर्थेनाङ्गुलद्वयेन पुनर्वर्द्धितः, तदा चतुस्त्रिंशदङ्गुलानि। स्वचतुर्थेन कीदृशेन—आत्मचतुस्त्रिंशोनेन। एवमङ्गुलद्वयस्य चतुस्त्रिंशो भागो यूकात्रयं लिक्षाषट्कं किंचिदूनं बालाग्रं च, तावता हीनेनाङ्गुलद्वयेन तृतीयो भागो वर्द्धितः। एवं च द्विहस्तकरण्येतावती सम्पन्ना—त्रयस्त्रिंशदङ्गुलानि, सप्त यवाः, चतस्रो यूकाः, द्वे लिक्षे, किंचिन्न्यूनं बालाग्रमिति। किं बहुना—तिलद्वयोनानि चतुस्त्रिंशदङ्गुलानि द्विहस्तकरणीत्यर्थ" इति।

आयामः = पार्श्वमानीत्वेन प्रसार्य; एवं क्षेत्रे त्रिकोणे कृते तस्य क्षेत्रस्याद्यणयारज्जुः त्रिकरणी स्यात्, हस्तमात्राणि त्रीणि चतुरस्राणि सङ्क्षिपतीत्यर्थः (१) ॥१४॥

त्रिकरणीकथनस्य प्रयोजनमाह—

तृतीयकरण्येतेन व्याख्याता ॥१५॥

एतेन त्रिकरणीकथनेन तृतीयकरणी अपि व्याख्याता। "प्रक्रमतृतीयेनावृत्तेन" (१६।२।२) इति सौत्रामण्यामुक्तम्। तत्र प्रक्रमस्य तृतीयो भागः प्रक्रमतृतीयं न भवति, किन्तु या करणी प्रक्रमक्षेत्रतृतीयांशं समचतुरस्रं करोति, सा प्रक्रमतृतीयशब्देनोच्यते, सैव तृतीया करणी। "वितृतीये यजेत" वितृतीयं वै सौत्रामणी" इति श्रूयते। तत्र तया तृतीयकरण्या प्रक्रमत्वेन कल्पितया या वेदिर्मीयते सा सोमवेदेस्तृतीयांशरूपा स्यात् (२) ॥१५॥

एवं त्रिकरणीकथनेन कथं तृतीयकरणी व्याख्यातेति स्पष्टयितुं सूत्रत्रयेणाह—

प्रमाणविभागस्तु नवधा ॥ १६ ॥

प्रमाणस्य = प्रक्रमरूपस्य विभागो नवधा विधेयः। "द्वादशाङ्गुलं पदम्" "द्विपदः प्रक्रमः" (श्लो. शु. ३४)। प्रक्रममितया रज्ज्वा क्षेत्रं चतुरस्रीकृत्य, तस्य तिर्यङ्मान्यौ पार्श्वमान्यौ च त्रेधा विभज्य, पूर्वापरायतं दक्षिणोत्तरायतं च सूत्रद्वयं दद्यात्। एवं नवधा विभागो भवति। एकैको भागः पदपदक्षेत्रकलकः स्यात्॥ १६ ॥

करणीतृतीयं नवभागः ॥१७॥

---

(१) महीधरः "यथा—हस्तमिता तिर्यङ्मानी, किंचिदूनचतुस्त्रिंशदङ्गुलांमता पार्श्वमानी, तयोरग्रं प्रापिता कर्णरज्जुस्त्रिकरणी त्रिहस्तक्षेत्रस्य करणी साधिका। तया साधितं समचतुरस्रं त्रिहस्तं भवतीत्यर्थः।"

(२) अत्र प्रक्रमशब्देन प्रक्रमपरिमितस्थलमापिका रज्जुरभिधीयते, न तु प्रक्रमः। तदुक्तौ प्रक्रमस्य विभागकरणमेव प्राप्नुयात्। स च दैर्घ्ये विस्तारे चोभयतः कर्तव्यो भवतीति नवमांशे पर्यवस्यति। तत्र च यागानुष्ठानं प्राप्नुयात्। तन्नेष्टम्। अतः प्रक्रममितं यत्क्षेत्रं, तस्य यस्तृतीयोंऽशस्तन्मापिका या रज्जुस्तया सूत्रं कृत्वोत्तरवेदिर्निष्पादनीयेति।

करण्याः = प्रक्रमरूपायास्तृतीयं = तृतीयो भागः पदरूपः करणीभूय चतुरस्रं कुर्वन् नवभागो भवति । नवमं भागं पदं सङ्क्षेपतीत्यर्थः ॥१७॥

नव भागास्त्रयस्तृतीयकरणी ॥१८॥

प्रक्रमरूपकरणीत्रयस्य समचतुरस्रस्य ये त्रयो नव भागाः सा तृतीयकरणी । सा चेत्थं कार्या । पदमितया करण्या समचतुरस्रं कृत्वा तत्कर्णसूत्रं पदद्विकरणीरूपं पार्श्वमानीं कृत्वा पदमितकरणीमेव च तिर्यङ्मानीं विधाय ताभ्यां दीर्घचतुरस्रे कृते तत्कर्णरज्जुस्तृतीयकरणी । सा च करणीभूय समचतुरस्रं कुर्यात्, तत्र त्रयो नव भागाः सङ्क्षिप्यन्ते ॥१८॥

एवं "तृतीयकरण्येतेन व्याख्याता" (२।१५) इति प्रतिज्ञातं सूत्रत्रयेण निरूप्य तृतीयकरण्याः प्रयोजनं सूत्रद्वयेनाह—

सौत्रामण्यां प्रक्रमार्था ॥१९॥

सौत्रामणीयागे प्रक्रमकथनाय तृतीयकरणी उक्ता । सौत्रामण्यां तृतीयकरणीरूपप्रक्रमेण सोमवद्वेदिर्मिता सती सौमिक्या वेदेस्तृतीयांशरूपा स्यात् ॥१९॥

त्रिकरणी समासार्था ॥२०॥

त्रिकरणी = तृतीयकरणी येयं पूर्वमुक्ता सा समासार्था = त्रयाणां प्रक्रमनवभागानां सङ्क्षेपार्था । तया विना नवभागत्रयस्य संक्षेपतुमशक्यत्वात् । अतः प्रक्रमनवभागत्रयमेव सौत्रामणीप्रक्रम इत्यर्थः ॥२०॥

उक्तं चतुरस्रसमासं निगमयति—

तुल्यप्रमाणानां समचतुरस्राणामुक्तः समासः ॥२१॥

तुल्यं प्रमाणं येषां तानि तुल्यप्रमाणानि हस्तादिरूपाणि । तादृशानां समचतुरस्राणां समासः = संक्षेप एकीकरणप्रकार उक्तः॥२१॥

एवं तुल्यप्रमाणानां समचतुरस्राणां समासमुक्त्वाऽतुल्यप्रमाणानां समचतुरस्राणां समासमाह—

नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसोऽपच्छिन्द्यात्तस्याद्दण्यारज्जुरुभे समस्यतीति समासः ॥२२॥

नानाप्रमाणानां = भिन्नप्रमाणानां समचतुरस्राणां समासे = संक्षेपे कार्ये ह्रसीयसो = ह्रस्वतरस्य समचतुरस्रस्य (अष्टाङ्गुलादेः) करण्या वर्षीयसो = वृद्धतरस्य (द्वादशाङ्गुलादेः) करणीं पार्श्वमानीं तिर्यङ्मानीं वाऽपच्छिन्द्यात् = ह्रस्वकरणीमानेन दीर्घकरणीं कोणतो मित्वा विदारयित्वाऽवशिष्टं चतुरङ्गुलादिभागं जह्यात्। तस्य ह्रस्वकरणीमानेन छिन्नस्य दीर्घक्षेत्रस्य अद्दण्यारज्जुः करणीभूय अन्यच्चतुरस्रं कुर्वती उभे = वृद्धह्रस्वतरे क्षेत्रे समस्यति संक्षिपति इति समासः = अतुल्यप्रमाणसमचतुरस्रसंक्षेपप्रकारः (१) ॥२२॥

इति कात्यायनशुल्बसूत्रवृत्तौ चतुरस्रादिक्षेत्रनिरूपणी द्वितीया कण्डिका ॥२॥

एवं ह्रस्वमहतोः क्षेत्रयोः समासं निरूप्य महत्क्षेत्रात् ह्रस्वक्षेत्रस्य पृथक्करणं कथं विधातव्यमित्याह—

चतुरस्राच्चतुरस्रं निर्जिहीर्षन् यावन्निर्जिहीर्षेत्तावदुभयतोऽपच्छिद्य शङ्कू निखाय पार्श्वमानीं कृत्वा पार्श्वमानीसम्मितामद्दण्यां तत्रोपसर्ठ०हरति समासेऽपच्छेदः सा करण्येष निर्हासः ॥१॥


तत्र बृहत्प्रमाणकसमचतुरस्रस्य एकपार्श्वगतकोणाभ्यां संमुखभुजयोरल्पचतुरस्रभुजतुल्ये रेखे अपच्छिद्य तच्छेदनबिन्दुद्वये शङ्कू निखाय, शङ्कुमूलयोर्बृहत्समचतुरस्रभुजतुल्यसूत्रं बद्ध्वा बृहच्चतुरस्रभुजतुल्यदैर्घ्यम् अल्पसमचतुरस्रभुजविस्तारं दीर्घचतुरस्रमुत्पादयेत्। तत्र एककोणाद् बृहत्समचतुरस्रभुजतुल्यां रेखां तथा


(१) महीधरः—यथा—द्वादशाङ्गुलकरणीकमेकं चतुरस्रं, तत्राष्टाङ्गुलकरणीकं समसितव्यं, तत्र द्वादशाङ्गुलकरण्यां कोणादारभ्याष्टाङ्गुलेषु चिन्हं कुर्यात्। चतुरङ्गुलानि यक्त्वा चिन्हादारभ्याभिमुखकोणान्तं कर्णसूत्रं दत्त्वा तन्मितकरण्या यच्चतुरस्रान्तरं क्रियते, तत्र ह्रस्वमहतोः क्षेत्रयोः समासः स्यात्। एवमन्ययोरपि ह्रस्वमहतोः क्षेत्रयोः समासप्रकारो बोध्यः।

ापयेत्, यथा तदग्रं संमुखपार्श्वमान्यां लगति । ततस्तद्योगबिन्दोः ोणदिग्गतभुजपर्यन्तं पार्श्वमानीखण्डं यत्, तत्र यत्समचतुरस्रं तदे- ाभीष्टम्, अर्थात् बृहत्प्रमाणाल्पप्रमाणसमचतुरस्रयोरन्तररूपम्(१)।

यथा—

अ क. ग. च. बृहत्प्रमाणकसमचतुरस्रात् इ उ. व. र. अल्प- माणकसमचतुरस्रमपनेतव्यम्, तदा अ. क. कोणाभ्याम् अ. प. क. . रेखे अल्पप्रमाणकसमचतुरस्रभुजतुल्ये छित्वा प. म. छेदनबिन्दुद्वये ङ्क निखाय प. म. शङ्कुमूलगता रेखा कार्या। एवं सति अ क. म. प. ीर्घचतुरस्रं निष्पद्यते। यत्र अ क प म. रेखे दीर्घचतुरस्रभुज- ुल्ये, अ. प., क. म. रेखे च अल्पचतुरस्रभुजतुल्ये आसाते ततः प्र. क भुजतुल्यां रेखां क. कोणबिन्दोस्तथा स्थापनीया, यथा तदग्रं ग. म. रेखायां ल बिन्दौ भवेत्। एवं सति ल म. रेखानिमित्तं सम- वतुरस्रंयत्, तदेव बृहच्चतुरस्राल्पचतुरस्रयोरन्तररूपं भवितुमर्हति॥१॥





(१) "चतुरस्रात् = महतः समचतुरस्रात् चतुरस्रं = ह्रस्वं समचतुरस्रं निर्जि- हीर्षन् = निर्हर्तुमिच्छन् पृथक्कर्तुमिच्छन् यावत् = यत्प्रमाणं समचतुरस्रं निर्जि- हीर्षात् = पृथक्कर्तुमिच्छेत्, तावत् = तत्प्रमाणां करणीमुभयतो महच्चतुरस्र गर्श्वमा- न्योरपच्छिद्य = श्रोणित आरभ्याङ्कयित्वा चिन्हद्वये शङ्कू निखाय पार्श्वमानीं कृत्वा शङ्कुद्वयप्रसारितां महच्चतुरस्रकरणीभूतां रज्जुं पार्श्वमानीत्वेन परिकल्प्य पार्श्वमानीसंमितां तामेव रज्जुमङ्कयां = कर्णसूत्रं तत्र = अधस्तिर्यङ्मान्यामुप- संहरति = एकतरशङ्कौ रज्जुपाशं निक्षिप्य तां रज्जुं तिर्यङ्मान्यामधः कर्णसूत्रत्वेन प्रसारयति स समासेऽपच्छेदः = समासे क्षेत्रद्वयस्यैक्ये कृते सति अपच्छेदस्त्याज्यो- ऽशः, तस्यां रज्जौ तिर्यङ्मानीस्पृष्टायां त्रिकोणे जाते त्रिकोणबहिर्भूतो यो महाचतु-

दीर्घचतुरस्रस्य समचतुरस्रीकरणोपायमाह—

दीर्घचतुरस्रार्ध० समचतुरस्रं चिकीर्षन्मध्ये तिर्यगपच्छि-द्यान्यतरद्विभज्येतरत्पुरस्ताद्दक्षिणतश्चोपदध्या च्छेषमागन्तुना पूरयेत्तस्योक्तो निर्हासः ॥२॥


अत्र आयामार्द्धविस्तारं चतुरस्रं दीर्घचतुरस्रपदेन व्यवह्रियते। दीर्घचतुरस्रं = विस्तारद्विगुणायामं चतुरस्रं समचतुरस्र कर्तु-मिच्छन् मध्ये तिर्यग्रज्जुं प्रसार्यापच्छिद्य = विभज्य आयामस्य तुल्यं भागद्वयं कृत्वा (तद्भागचिह्नात् तिर्यङ्मानीसूत्रप्रसारणेन द्वे समचतुरस्रे कृत्वा) अन्यतरद् विभज्य = तत्र एकतरस्य समचतुरस्रस्य पुनस्तथैव भागद्वयकरणेन द्वे दीर्घचतुरस्रे विधाय, इतरत् = भागद्वयं पुरस्ताद्-दक्षिणतश्चोपदध्यात् = एकं भागं दीर्घचतुरस्ररूपं पूर्वत्र अविभक्तसम-चतुरस्रे तिर्यगायामं कृत्वा योजयेत्, अन्यं भागं दक्षिणस्यां प्रागा-यामं कृत्वा योजयेत्, शेषम् = समचतुरस्रे क्रियमाणे न्यूनमाग्नेय कोणगतमष्टमांशमागन्तुना = अध्याहृतेनाष्टमांशेन पूरयेत्।

नन्वेवं समचतुरस्रमधिकं जातम्, अष्टमांशस्याध्याहृतत्वात्, अत आह-तस्योक्तो निर्हासः—तस्यागन्तोरंशस्य निर्हासः = त्यागः कार्यः, स च त्यागप्रकार उक्तः "चतुरस्राच्चतुरस्रं निर्जिहीर्षन्" इति सूत्रे (३।१)।

यथा—अ. इ. उ. क. दीर्घसमचतुरस्रमास्ते। अ. इ. दैर्घ्य-रेखायाः ख. बिन्दौ भागद्वयकरणेन, ततश्च ख. ङ. रेखाकरणेन च—क. ख., ङ ई, इति समचतुरस्रद्वयं जातम्। तत्र ङ. ई. समचतुरस्रस्य ग. बिन्दौ तथैव भागद्वयकरणेन ङ. ग. घ. इ. इति दीर्घचतुरस्रद्वयं जायते। ततः घ. इ. दीर्घचतुरस्रं अ. छ. रूपेण निवेशितं, यथा अ. च. रेखा अ. क. रेखा एकैव भवेत्। एवं सति ख. छ. ख. ङ, रेखाऽपि एकैव स्यात्। ततः च. छ., ग. घ. रेखयोः ख. मार्गे वर्द्धनेन क. च. प. घ. समचतुरस्रं जातम्। यत्र

रस्रतिर्यङ्मानीभागः सोऽपच्छेदः = त्यक्तव्यः, सा करणी = त्रिकोणान्तःपाती तिर्य-ङ्मानीभागः करणी, तया करण्या कृतमन्यच्चतुरस्रं ह्रस्वक्षेत्रे महतः पृथक्कृते शेषं-क्षेत्रं भवति। एष निर्हासः = महत्क्षेत्राद् ह्रस्वस्य पृथक्करणोपायः" इति महीधर व्याख्या।

प. लघुसमचतुरस्रमधिकमिति तु स्पष्टम् । ततः ख. प. बृहत्समतुरस्रात् ख. प. समचतुरस्रस्य निर्हासेन (१) यत्समचतुरस्रं तत् भीष्टदीर्घसमचतुरस्रमिति ॥२॥



एवं विस्तारद्विगुणायामदीर्घचतुरस्रस्य समचतुरस्रकरणकारमुक्त्वा इदानीं विस्तारद्विगुणाधिकायामदीर्घचतुरस्रस्य समतुरस्रसाधनोपायमाह—

अतिदीर्घं चेत्तिर्यङ्मान्याऽपच्छिद्याऽपच्छिद्यैकसमासेन समस्य शेषं यथायोगमुपसर्ठ०हरेदित्येकसमासः ॥ ३ ॥


अतिदीर्घं = विस्तारद्विगुणाधिकायामं दीर्घचतुरस्रं चेत् तदा तिर्यङ्मान्या दक्षिणोत्तररज्वा पार्श्वमानीसूत्रमपच्छिद्य अपच्छिद्य =

---

(१) निर्हासप्रकारश्च (२)—बृहत्समचतुरस्रात् लघुसमचतुरस्रं निर्हातुमेच्छन् बृहत्समचतुरस्रसंमुखभुजयोः लघुसमचतुरस्रभुजतुल्ये रेखे छित्वा तच्छेदबिन्दुद्वयगतपार्श्वमानीरूपप्रसारणेन बृहत्समचतुरस्रभुजतुल्यपार्श्वमानीकं लघुसमचतुरस्रभुजतुल्यतिर्यङ्मानीकं च दीर्घचतुरस्रं जायते । तत्र एककोणात् बृहत्समचतुरस्रभुजतुल्यसूत्रं तथाऽक्षगयारूपेण प्रसारयेत्, यथा तदग्रं संमुखपार्श्वमानीसंलग्नं भवेत् । एवं सति तत्संयोगबिन्दोः अभीष्टकोणगततिर्यङ्मानीपर्यन्तं यत् संमुखपार्श्वमानीखण्डं तद्रूपकरण्या निर्मितं समचतुरस्रं चिकीर्षितं समचतुरस्रं भवितुमर्हति ।


पुनः पुनर्विभज्य विभज्य तत्तच्छेदनबिन्दुतः तिर्यङ्मानोसूत्रप्रसारणेन समचतुरस्राणि कृत्वा तानि एकसमासेन (द्विकरणी—त्रिकरणीत्यादिविधानेन) समस्य = संयोज्य, अर्थात् तेषां योगतुल्यं समचतुरस्रं यथायोगं यया कयाऽपि युक्त्या उपसंहरेत् = समस्येत एकी कुर्यात् इत्येकसमासः = एकसमचतुरस्रीकरणोपायः । यथा—

अ. इ. उ. क. दीर्घचतुरस्रं यस्य समचतुरस्रकरणमभीष्टम्, तदा अ. क तिर्यङ्मानीतुल्यानि अ. क, ग. च, च. प, खण्डानि कृत्वा तत्तद्बिन्दुतः ग ल, च. व, प. र, तिर्यङ्मानीरेखाकरणेन क. ग, ल. च, व. प, इति त्रीणि समचतुरस्राणि जातानि । शिष्टं च र. इ. दीर्घचतुरस्रं भवेत् । ततः उक्तसमचतुरस्राणां योगतुल्यं समचतुरस्रं त्रिकरणीविधानरीत्या (१) त. थ. द. ध. तुल्यं विधाय, शिष्टस्य च र. इ. मितस्य दीर्घचतुरस्रस्य तुल्यं समचतुरस्रं दीर्घचतुरस्रमिति पूर्वसूत्रोक्तप्रकारेण ट. ठ. ड. ढ. तुल्यं कृत्वा ततोऽनयोर्विहितसमचतुरस्रयोर्योगतुल्यं समचतुरस्रं "नानाप्रमाणसमासे" (२।२२) इत्यादिशास्त्रेण (२) ए. ऐ. ओ. औ. तुल्यं निष्पादयेत् । एवम् इदमेव समचतुरस्रमतिदीर्घचतुरस्रतुल्यं निष्पन्नम् ॥ ३ ॥



(१) अत्र त्रिकरणीविधानमाह—समचतुरस्रस्य अक्ष्णयारज्जुर्द्विकरणी भवति, अर्थात् तादृशकरण्या विहितं समचतुरस्रमभीष्टसमचतुरस्राद् द्विगुणं भवति। अत्र अभीष्टसमचतुरस्रप्रमाणतुल्या तिर्यङ्मानी, द्विकरणी पार्श्वमानी, तत्र अक्ष्णया रज्जुस्त्रिकरणी भवति ।

(२) अत्र भिन्नप्रमाणयोः समचतुरस्रयोः समासप्रकारमाह—यत्र अल्पप्रमाणं तिर्यङ्मानं, बृहत्प्रमाणं पार्श्वमानं, तत्र अक्ष्णयारज्जुः करणी । अनया करण्या यत्समचतुरस्रं, तत् तयोर्भिन्नप्रमाणसमचतुरस्रयोर्योगतुल्यं भवितुमर्हति ।




इदानीं समचतुरस्रस्य विषमचतुरस्रस्य च दीर्घचतुरस्रकरण-कारमाह—

समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन्मध्येऽदणयाऽपच्छिद्य विभज्येतरत्पुरस्तादुत्तरतश्चोपदध्याद्, विषमं चेद्यथायोगमुपसर्ठ०हरदिति व्यासः ॥४॥

समचतुरस्रं दीर्घचतुरस्रं = विस्तारद्विगुणायामं कर्त्तुमिच्छन् मध्ये अपच्छिद्य = अर्थात् कर्णरूपया अदणयया विभज्य, अग्निकोणाद् वायव्यकोणान्तं सूत्रप्रसारणेन भागद्वयं कृत्वा, अपच्छिन्नमंशं पुनर्विभज्य = नैर्ऋतकोणाददणयार्द्धं यावद् भागद्वयं कृत्वा त्रिकोणद्वयं समुत्पादनीयम्, तत्र इतरत् = एकं त्रिकोणं पुरस्तात् = पूर्वस्यां योजयेत्, अपरं च उत्तरस्यां योजयेत्, तथा सति दिक्कोणं विस्तारद्विगुणायामं दीर्घचतुरस्रं स्यात्। क्षेत्रज्ञानमात्रमेवास्य प्रयोजनम्।

यथा—अ. इ. उ. क. समचतुरस्रस्य दीर्घचतुरस्रकरणमभीष्टम्, तदत्र इ. क. अक्ष्णयया इ. क. अ, इ. क. उ, इति विभागद्वयं कृत्वा. तत्र इ. क. उ, त्रिभुजे ख अक्ष्णयादलबिन्दोः उ कोणपर्यन्तं ख. उ. सूत्रप्रमाणेन इ ख. उ, उ. ख. क, इति त्रिभुजद्वयं जातम्। तत्र इ. ख. उ, त्रिभुजं इ. ग. उ, रूपेण तथा स्थापितं यथा इ. उ. अक्ष्णया इ. अ. रूपा स्यात्, ख. कोणश्च ग. बिन्दुगतो भवेत्। एवमेव उ. क. ख, त्रिभुजमपि अ. क. घ. रूपेण तथैव स्थापनीयम्। ततः इ. ग. घ. क. चतुर्भुजं दीर्घाख्यं जातम्। इ. ग. विस्तारस्य इ. ख. दैर्घ्यार्द्धसमत्वात् (१)।




विषमचतुर्भुजस्य दीर्घचतुरस्रकरणप्रकारमाह-विषमं चेदिति।

विषमचतुर्भुजस्य दीर्घचतुरस्रं कर्तुमिच्छन् यथायोगं यथासंभवमुपसंहरेत्, कुर्यादित्यर्थः। अर्थात् विषमचतुरस्रस्य समचतुरस्रत्वं विधाय ततः पूर्वोक्तविधिना दीर्घचतुरस्रत्वं कुर्यादित्येवमुपसंहारः (व्यासः समासः)।

यथाऽत्र कल्प्यताम्—अ. इ. उ. क. विषमचतुर्भुजमास्ते, यत्र अ. क. भुजात् इ. उ भुजो द्विगुणः, अ. ग. विस्तारमानं च अ. क. समम्, तदाऽत्र अ. ग, क. घ. तिर्यङ्मानीसूत्रप्रसारणेन अ. क. घ.

(१) अत्र त्रिभुजस्थापने विधीयमाने अ ग; अ. घ. रेखाद्वयमपि एकैव रेखेति दीर्घतुचरस्रसमुत्पादने नान्यथात्वेन भ्रमितव्यम्।

एकं समचतुरस्रम्, तथा अ. ग. इ, क. घ. ङ. त्रिकोणद्वयं त्येवं त्रीणि क्षेत्राणि जायन्ते। तत्र अ. ग. इ. त्रिकोणं क. उ. त. पेण तथा निवेशितं यथा अ. इ. रेखा क. उ. रूपेण तिष्ठति, ग. णश्च त. बिन्दुगतश्च भवेत्। एवं सति अ. ग. उ. त. चतुर्भुजमपि र्वोक्तविषमचतुर्भुजतुल्यमेवेति स्पष्टमेव। ततः क. त. रेखायाः ट. लबिन्दुतः ट. च. तिर्यक्सूत्रप्रसारणेन क. घ. च. ट. ट. च. उ. त. ते चतुर्भुजद्वयं जातं, तत्र ट. च. उ. त. चतुर्भुजस्य अ. प. फ. क. पेण निवेशनेन ट. च, प. फ, रेखयोः ब. बिन्दुं यावद्वर्धनेन यत् प. . च. ग. समचतुर्भुजं जातं, तत्र फ. ब. ट. क. समचतुरस्रम् द्दिष्टसमचतुरस्रापेक्षयाऽधिकम्। तस्य "चतुरस्राच्चतुरस्रम्" ३।१) इति निर्हासप्रकारेण निर्हासे कृते यत् समचतुरस्रं, तत् द्दिष्टविषमचतुर्भुजसममिति स्पष्टमेव। ततस्तस्य दीर्घचतुरस्रत्व-रणं पूर्वोक्तयुक्त्या स्पष्टमेव। एवं सति विषमचतुरस्रस्य दीर्घ-मचतुरस्रत्वं निष्पन्नम् ॥ ४ ॥



नियमविशेषमाह—

प्रमाणं चतुरस्रमादेशादन्यत् ॥५॥

प्रमाणे वक्तव्ये अनादेशे समचतुरस्रमेव प्रमाणं भवति, यथा धिष्ण्यानाम्। आदेशे तु अन्यत् प्रमाणं मण्डलादि भवति, यथा— गार्हपत्यादिखरेषु। सोमयागे मृदा निर्मिताः स्वल्पवेदिका अष्टा दशाङ्गुलसमचतुरस्राश्चतुरङ्गुलोच्चा अग्नीनामाश्रयभूता धिष्ण्या इत्युच्यन्ते ॥५॥

पूर्वमुक्तानां करणीनां क्षेत्रफलं वक्तुमुपक्रमते—

द्विप्रमाणा चतुःकरणी, त्रिप्रमाणा नवकरणी, चतुःप्रमाणा षोडशकरणी ॥६॥

द्वे प्रमाणे यस्याः सा द्विप्रमाणा करणी। तया द्विहस्तप्रमाणकरण्या कृतं समचतुरस्रं चतुःकरणी = चतुर्हस्तक्षेत्रफलकं स्यात्। एवं त्र्यरत्निकरण्या कृतं समचतुरस्रं नवारत्निक्षेत्रफलकं भवति। चतुरत्निकरण्या कृतं समचतुरस्रं षोडशारत्निक्षेत्रफलकं भवति। एतत्क्षेत्रप्रदर्शनम् ॥६॥

यदुक्तं तदेवानुक्तोदाहरणेऽपि बोधयितुं विशदयति—

यावत्प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान्समस्येत् ॥७॥

यावत् प्रमाणा रज्जुः समचतुरस्रीकरणार्थं करणी क्रियते तावन्तस्तावन्तो वर्गास्तत्क्षेत्रफलरूपाः स्युः। वर्गो नाम सदृशाङ्कगुणनम्। यथा पञ्च पञ्चगुणाः पञ्चविंशतिः पञ्चवर्गाः। तेन पञ्चगुणा करणी रज्जुः करणी कृता यत्समचतुरस्रं करोति तत्पञ्चविंशति क्षेत्रफलकं स्यात्। एवं षड्गुणया कृतं षट्त्रिंशत्क्षेत्रफलकमित्यादि ज्ञेयम् ॥७॥

वर्गस्य मूलाङ्कादधिकत्वेन दर्शनात् अर्धादिमानया रज्ज्वा कृतं समचतुरस्रमर्धादितोऽधिकप्रमाणं विज्ञाय अतिकारुणिकेन सूत्रकृता ये गणितं न विदुस्तान्प्रत्येतदुच्यते—

अर्धप्रमाणेन पादप्रमाणं विधीयते ॥ ८ ॥

अर्धमानया रज्ज्वा यत् क्षेत्रं समचतुरस्रीक्रियते तस्य अर्द्धमिता या रज्जुः, तया करण्या यावत्समचतुरस्रीक्रियते तावतः क्षेत्रस्य पादः = तुरीयो भागो भवति ॥ ८ ॥

तृतीयेन नवमोंऽशः ॥ ९ ॥

एवं करणीतृतीयेन भागेन करण्या कृतं समचतुरस्रं तत्करणी चतुरस्रान्नवमोंऽशो भवति त्र्यंशगुणात्, त्र्यंशो हि नवमोंऽशः ॥ ९ ॥

चतुर्थेन षोडशी कला ॥१०॥

करणीचतुर्थांशेन करण्या कृतं समचतुरस्रं षोडशांशक्षेत्रफलकं भवति ॥१०॥

पादस्य नवमांशस्य षोडशांशादेश्च पृथुक्षेत्रादपकर्षः कथं कर्तव्यस्तदाह—

एष निर्हासस्तस्य पुरस्तादुक्तर्ठ० शास्त्रम् ॥११॥

एष निर्हासः = अल्पक्षेत्रसाधनम् । तस्य निर्हासस्य क्षेत्रात् क्षेत्रान्तरानयनस्य शास्त्रं "चतुरस्राच्चतुरस्रं निर्जिहीर्षन्" (३।१) इत्यादि पूर्वमुक्तम् ॥११॥

यावत्प्रमाणा रज्जुर्भवतीति विवृद्धेर्ह्रासो भवति ॥१२॥

"अर्द्धप्रमाणेन पादप्रमाणम्" (३।८) इत्यादिना यः क्षेत्रस्य ह्रास उक्तः स कस्य, इत्यपेक्षायाम् "यावत्प्रमाणा रज्जुर्भवति तावन्तो वर्गा भवन्ति" (३।७) इति सूत्रेण या क्षेत्ररूपा वृद्धिरुक्ता, तस्या विवृद्धेरयं ह्रासो भवति । यथा—करणीचतुर्थांशेन चतुरस्रे कृते करण्या षोडशांशस्य समास इत्यादि ॥ १२ ॥

चतुरस्रस्य मण्डलकरणमाह—

चतुरस्रं मण्डलं चिकीर्षन्मध्यादर्ठ०से निपात्य पार्श्वतः परिलिख्य तत्र यदतिरिक्तं भवति तस्य तृतीयेन सह मण्डलं परिलिखेत्स समाधिः ॥ १३ ॥

चतुरस्रं क्षेत्रं मण्डलं = वृत्तं कर्तुमिच्छन् मध्यात् = चतुर्भुज मध्यात् अंसे = चतुर्भुजकोणे सूत्रं निपात्य दत्त्वा = चतुरस्रे करणसूत्रद्वये दत्ते सूत्रयोः संयोगस्थलं मध्यं स्यात् । ततो मध्यादारभ्य अंसान्तं पातिते अर्द्धकरण्यार्द्धरूपे सूत्रे पार्श्वतः = पार्श्वमानेन करण्यर्धेन अङ्कयित्वा यदतिरिक्तम् = अङ्कनादधिको भागो भवति (तं त्रेधा विभज्य) तस्य शिष्टस्य तृतीयेनांशेन सह करण्यर्द्धं संवर्द्ध्य तन्मा-

नेन मण्डलं परिलिखेत्, स समाधिः = चतुरस्रस्य मण्डलकरण-प्रकारः (१) ॥ १३ ॥

मण्डलस्य चतुरस्रीकरणमाह—

मण्डलं चतुरस्रं चिकीर्षन् विष्कम्भं पञ्चदश भागान् कृत्वा द्वावुद्धरेच्छेषः करणी ॥ १४ ॥

मण्डलं = वृत्तक्षेत्रं चतुर्भुजं चिकीर्षन् विष्कम्भं = वृत्तव्यासं पञ्चदश भागान् = अष्टादश भागान् कृत्वा द्वौ भागौ उद्धरेत् = त्यजेत्, शेषः = त्रयोदशभागरूपः करणी । तत्करणीकृतं समचतुरस्रं वृत्ततुल्य क्षेत्रफलं स्यात ॥ १४ ॥

इति समासनिरूपणी, तृतीया कण्डिका ॥३॥

अग्निचितीर्निरूपयति—

द्रोणचिद्रथचक्रचित्कङ्कचित्प्रऽउगचिदुभयतः प्रउगः, समुह्यपुरीष इत्यग्नयः ॥१॥

कात्यायनश्रौतसूत्रे षोडशेऽध्याये सुपर्णचितिश्चतुरस्रा विहिता, द्रोणचिदादयश्चानुक्ता अत्रोच्यन्ते। द्रोणश्चतुरस्रः। तदाकारा चितिर्द्रोणचित्। रथचक्रं वृत्तम्, तदाकारा वृत्ता चिती रथचक्रचित्। कङ्को = वको गगन उड्डीयमानः। तदाकारा चितिः कङ्कचित्। प्रउगः = शकटाङ्गं शकटस्याग्रभागःऽयस्मि, तदाकारा चितिः प्रउगचित्। उभयतस्त्र्यस्राकारा मध्यस्थूला चितिरुभयतः प्रउगचित्। अन्यत आनीय समूह्यः = समूहीकृतः पुञ्जीकृतः पुरीषो = मृत्तिका, तदिव चितिः समूह्यपुरीषचिदित्युच्यते। एतेऽग्नयः = यत्राग्निः प्रणीयते तानीष्टकाचितिस्थानानि बोध्यानि (२)। अत्रा-

---

(१) यथा—षोडशाङ्गुलस्य चतुरस्रस्य मध्यादंसान्तं कर्णसूत्रमेकादशाङ्गुलं भवति। तत्र पार्श्वमानाष्टाङ्गुलैश्चिह्ने कृते शेषमङ्गुलत्रयम्। तत्तृतीयो भागोऽङ्गुलम्। तत्सहिताष्टाङ्गुलमानेन नवाङ्गुलरज्ज्वा मध्याद् वृत्ते कृतेऽष्टादशाङ्गुलं वृत्तं भवति। तच्च षोडशाङ्गुलचतुरङ्गुलतुल्यक्षेत्रफलकं भवतीति।

(२) अग्निशब्देन इष्टकाभिः सम्पादितमध्याधारभूतं स्थण्डिलमुच्यते

; शाखान्तरविहिते श्येनचित् अलजचिती अपि ऊह्ये । श्येनाकारा तेः श्येनचित् । अलजः पक्षौ, तदाकारा चितिरलजचित् ॥१॥

एवमग्नीनुद्दिश्य क्रमेण तेषां क्षेत्रसमासं विवक्षुर्द्रोणचिदाकार-धनमाह—

द्रोणे यावानग्निः सपक्षपुच्छविशेषस्तावत्समचतुरस्रं कृत्वा द्रोणदशमो विभागो वृन्तमित्येके ॥२॥

पक्षौ च पुच्छं च विशेषश्च पक्षपुच्छविशेषाः (१) । तैः सहितः पक्षपुच्छविशेषः । द्रोणे द्रोणाकारे चतुरस्रेऽग्निक्षेत्रे कर्तव्ये क्ष-पुच्छ-विशेषसहितो यावानग्निः = यावदग्निस्थानं सार्द्धसप्तपुरुषात्मकं, तत्प्रमाणकं चतुरस्रं कृत्वा तावत् नानाप्रमाणसमासविधिना मस्य, समसितस्य समचतुरस्रस्य द्रोणस्य दशमांशो वृन्तं वृन्ताकारं एडाकारं स्वल्पचतुरस्रं योजनीयमित्येके आचार्या अभिप्रयन्ति । क्रग्रहणाद्विकल्पः ॥२॥

वृन्तकरणप्रकारं तद्योजनविधिं चाह—

तद्दशमेनापच्छिद्यापच्छिद्यैकसमासेन समस्य निर्हृत्य पूर्वमग्निं तथाकृतिं कृत्वा पुरस्तात्पश्चाद्वोपदधात् ॥३॥

तत् = पूर्वोक्तं सार्धसप्तपुरुषात्मकं पक्षपुच्छविशेषयुतं समच-तुरस्रमग्निक्षेत्रं समचतुरस्रं कृत्वा तस्य समचतुरस्रक्षेत्रभुजस्य दशमेन = दशमांशेन तिर्यङ्मानीं पार्श्वमानीं च दशधा अपच्छि-द्यापच्छिद्य = विभज्य शतांशीकृत्य तत्र तिर्यङ्मान्योः पार्श्वमान्योर्वा प्रथमविभागान्तयो रज्जुप्रसारणेन चतुरस्रक्षेत्रभुजप्रमाणपार्श्व मानीकं तद्दशमांशतिर्यङ्मानीकं यदतिदीर्घक्षेत्रं दशमांशरूपं जायते

(१) चितिरियं सार्द्धसप्तपुरुषात्मिका, तत्र मध्ये द्विपुरुषायामं द्विपुरुष-विस्तारं चतुरस्रं स्थण्डिलं निर्माय तत्संलग्नमेव दक्षिणपश्चिमोत्तरेषु त्रिष्वपि एकै-कपुरुषविस्तारं दक्षिणोत्तरपार्श्वयोः सारद्विकैकैकपुरुषायामं, पश्चिमे च सवित-स्तिकपुरुषायामं स्थण्डिलत्रयं निर्मातव्यम् । स्थण्डिलमिदं प्राङ्मुखं मन्तव्यम् । तस्य दक्षिणोत्तरयोर्ये स्थण्डिले, तयोः क्रमाद्दक्षिणोत्तरौ पक्षौ इति संज्ञा । पश्चिमस्य च पुच्छमिति व्यवहारः, मध्यभागस्य चात्मेति । अस्या एव चितेः सुपर्णचिति-रिति नाम ।

तत् एकसमासेन समस्य समचतुरस्रीकृत्य, एकीकृत्य, निर्हृत्य = "अतिदीर्घं चेत्" इत्युक्तविधिना (३।३) पृथक् कृत्वा, शिष्टं सर्वमग्निं तथाकृतिं = द्रोणाकारं कृत्वा निर्हृतंदशमांशं पुरस्तात्पश्चाद्वोपदध्याद्योजयेत् । अवशिष्टं चतुरस्रभुजपार्श्वमानीकं स्वदशमांशोनचतुरस्रं तत् = पूर्वोक्तभुजप्रमाणतिर्यङ्मानीकं नवभागात्मकं क्षेत्रं दीर्घचतुरस्राख्यं तथाकृतिं द्रोणाकृतिं समचतुरस्ररूपं कृत्वा तस्य समचतुरस्रस्य पुरस्तात्पश्चाद्वा वृन्तरूपं समचतुरस्रमुपदध्यात् योजयेत् मेलयेदिति यावत् ॥३॥

मण्डलेऽप्येवम् ॥४॥

मण्डले = मण्डलाकारायां रथचक्रचितौ कङ्कचितावपि वृन्ताधानपक्षे = एवम् पूर्ववत् पक्षपुच्छसमासेन चतुरस्रं कृत्वा तद्दशमांशमपहृत्य चतुरस्रं पूर्वोक्तविधिना कृत्वा तमपि वृत्तं विधाय पुरस्तात्पश्चाद्वा योजयेत् । क्षेत्रदशमांशं वृन्तं "मण्डलं चतुरस्रं चिकीर्षन्" (३।१४) इत्यादिना वृत्तं सम्पाद्य पुरस्तात्पश्चाद्वोपदध्यात् । पक्षपुच्छविशेषसहितस्यात्मनोऽपि मण्डलता "मण्डलं चतुरस्रं चिकीर्षन्" (३।१४) इत्यनेनैव सम्पादनीयेति ॥४॥


प्रउगचितिमाह—

प्रउगे यावानग्निः सपक्षपुच्छविशेषस्तावद् द्विगुणं समचतुरस्रं कृत्वा यः पुरस्तात्करणीमध्ये शङ्कुर्यौ च श्रोण्योः सोऽग्निः ॥५॥

प्रउगसंज्ञके त्र्यस्रेऽग्निक्षेत्रे कर्तव्ये यावत्प्रमाणकमग्निक्षेत्रं पक्षपुच्छविशेषसहितं, तत्प्रमाणकं समचतुरस्रं कृत्वा तद् द्विकरण्या द्विगुणितं कृत्वा समचतुरस्रं पुनर्विधाय तस्य द्विगुणरूपसमचतुरस्रक्षेत्रस्य करणीमध्ये पुरस्ताद्यः शङ्कुः, श्रोण्योश्च यौ शङ्कू, तच्छङ्कुत्रयमूलेषु सूत्रं निपात्य यत् त्र्यस्रक्षेत्रं द्विगुणसमचतुरस्रार्धरूपं जायते सेयं प्रउगचितिः ।

अथाऽत्र अ. इ. उ, प्रउगक्षेत्रम्, यत्र क. तिर्यङ्मानोदलबिन्दुः, ततः अ. क, सूत्रप्रसारणेन अ. क. इ, अ. क. उ, इति त्र्यस्रद्वयं

तम्, तत्र अ. क. इ, त्र्यस्रि क्षेत्रस्य अ. ग. उ, रूपेण स्थापनेन अ. उ. क, दीर्घचतुरस्रं प्रउगक्षेत्रसममिति स्पष्टमेवेति ॥५॥



उभयतः प्रउगचितिमाह—

उभयतःप्रउगे तावदेव दीर्घचतुरस्रं कृत्वा करणीमध्येषु शङ्कवः स समाधिः ॥६॥

उभयतःप्रउगेऽग्नौ कर्तव्ये यावानग्निः, तत्प्रमाणकं सपक्षपुच्छं चतुरस्रं कृत्वा अथ तत्प्रमाणकमेव समचतुरस्रं तत्र पुरस्ताद्धर्धयित्वा वेस्तारद्विगुणं दीर्घचतुरस्रं निष्पाद्य, ततस्तिर्यङ्मान्योः पार्श्वमान्योश्च मध्येषु चत्वारः शङ्कवो निखेयाः। तत्र सूत्रचतुष्के दत्ते = उभयतस्त्रिकोणा चितिर्भवति, स समाधिश्चितिप्रकारः ॥६॥

प्रउगस्य चतुरस्रीकरणोपायमाह—

प्रउगं चतुरस्रं चिकीर्षन्मध्ये प्राञ्चमपच्छिद्य विपर्यस्येतरत उपधाय दीर्घचतुरस्रसमासेन समस्येत्स समाधिः ॥७॥


प्रउगं = त्रिकोणं चतुरस्रं = समचतुरस्रं कर्तुमिष्यते चेत् तदा मध्ये प्राञ्चं = पूर्वभागमपच्छिद्य = विभज्य तिर्यङ्मानीं द्विधा कृत्वा, ततः पूर्वत्रिकोणाग्रं यावत् सूत्रप्रसारणेन त्रिकोणद्वयं

जायते; तत एक त्रिकोण विपर्यस्य विपरीतं = पश्चिममुखं कृत्वा तथा निदध्यात् यथा पूर्वप्रउगक्षेत्रभुजोऽदणया भवेत्। एवं कृते त्रिकोणद्वयसयोगेन यद्दीर्घचतुरस्रं जायते तत्प्रउगक्षेत्रतुल्यम्। तद्दीर्घचतुरस्रं समचतुरस्रं कुर्यात्। एवं प्रउगक्षेत्रस्य समचतुरस्रीकरणं निष्पन्नम्, स समाधिः त्रिकोणस्य समचतुरस्रकरणप्रकारः ॥ ७ ॥

उभयतः प्रउगस्य चतुरस्रीकरणोपायमाह


उभयतः प्रउगं चेन्मध्ये तिर्यगपच्छिद्य पूर्ववत्समस्येत् ॥८॥

यदि उभयतः प्रगउं = त्रिकोणं समचतुरस्रं कर्तुमिष्यते तदा उभयतः त्र्यस्रिद्वययोगसूत्रस्य चतुरस्राकारस्य उभयतः प्रउगक्षेत्रस्य अदणासूत्रद्वयप्रसारणेन उक्तक्षेत्रे चत्वारि त्र्यस्रिक्षेत्राणि उत्पाद्य एकैकं त्र्यस्रिक्षेत्रं स्वपार्श्वगतत्र्यस्रिक्षेत्रादितरतो विपर्यस्य तथा स्थापयेत् यथा प्रउगक्षेत्रभुजः अदणारूपो भवेत्। एवं सति दीर्घचतुरस्रद्वययोगेन प्रउगक्षेत्रं लघ्वदणयार्द्धमतिदीर्घं बृहददणया दीर्घचतुरस्रमुभयतःप्रउगक्षेत्रतुल्यं भवति। तद्दीर्घचतुरस्रं पूर्ववत्समचतुरस्रं कुर्यात्। एवमुभयतः प्रउगक्षेत्रस्य समचतुरस्रीकरणं निष्पन्नम्। अत्र अ. इ. उ. क. उभयतः प्रउगक्षेत्रम्, अ. उ, बृहददणया, क. इ, लघ्वदणया, अ. उ. ग. प, अतिदीर्घसमचतुरस्रमुभयतःप्रउगक्षेत्र सममिति ॥ ८ ॥



एतेनैव त्रिकर्णसमासो व्याख्यातः पञ्चकर्णानां च प्रउगेऽपच्छिद्य ॥ ६ ॥


एतेनैव प्रकारेण त्रिकर्णसमासः त्रिभुजाकारप्रउगक्षेत्रस्य समचतुरस्रीकरणप्रकारो व्याख्यातो भवतीत्यर्थः । यथा-प्राक् तिर्यङ्मानीकप्रमाणात् द्विगुणितपश्चात्तिर्यङ्मानीकं तुल्यपार्श्वमानीकद्वयं यत् समचतुरस्रं, (वेदिरूपं) तत् अंसाभ्यां पश्चात्तिर्यङ्मानीमध्यं यावत् सूत्रद्वयप्रसारणेन त्रीणि त्र्यस्राणि जायन्ते । तत्र त्र्यस्रद्वयमूर्ध्वमुखम्, एकं चाधोमुखम् । ततः तेषां त्र्यस्राणां समचतुरस्रीकरणं पूर्ववत्



यथाऽत्र अ. इ. उ. क, वेदीरूपं क्षेत्रम्, यत्र अ. इ, प्राक्तिर्यङ्मानीकम् उ. क, पश्चात्तिर्यङ्मानीकम्, अ. क, इ. उ, पार्श्वमानोद्भवं, ग मध्यबिन्दुः । अ. ग, इ. ग, सूत्रप्रसारणेन अ. क. ग, क. इ. ग, इ. ग. उ, इति त्रिभुजत्रयं जायते । एवं पञ्चानां त्र्यस्रिक्षेत्राणां समचतुरस्रीकरणप्रकारो भवितुमर्हति । तत्र पञ्चापि त्र्यस्राणि समानि चेत् तदा द्वयोर्द्वयोस्त्र्यस्रिक्षेत्रयोर्योगेन उभयतः प्रउगक्षेत्रद्वयम्, एकं त्र्यस्रि क्षेत्रं च भवितुमर्हति । ततः पूर्ववत् उभयतः प्रउगक्षेत्रद्वयं समचतुरस्रीकृत्य शिष्टं त्रिभुजं च पूर्ववदेव समचतुरस्रीकुर्यात् । ततस्तेषां समचतुरस्राणां योगरूपमेकं समचतुरस्रं निष्पादयेदिति । एवं पञ्चकर्णानां समचतुस्रीकरणप्रकारो निष्पद्यते । यदि त्र्यस्रिक्षेत्राणि विषमानि स्युस्तदा पृथक् पृथक् प्रउगक्षेत्रसमचतुरस्रीकरणरीत्या पञ्चापि समचतुरस्राणि निष्पाद्य तानि एकसमासेन समस्येत् ।

अत्र द्वयोर्द्वयोस्त्र्यस्रिक्षेत्रयोर्योगेन एकैकमुभयतः प्रउगक्षेत्रं, शिष्टं च त्र्यस्रिक्षेत्रमेकमिति ॥६॥

क्षेत्रदर्शनम्



एककर्णानां द्विकर्णानां च समचतुस्रेऽपच्छिद्य ॥१०॥

एककर्णानां = तुल्यकर्णानां पञ्चानां त्र्यस्रीणां प्रउगेऽपच्छिद्योक्तरीत्या समासः। द्विकर्णानां च समचतुरस्रे वृद्धकरणीमपच्छिद्य नाना प्रमाणेत्युक्तविधिना समासः कार्यः ॥ १० ॥

इति शुल्बवृत्तौ चितिनिरूपणी चतुर्थी कण्डिका ॥४॥

"द्विपुरुषां रज्जुं मित्वा" (१६।८) इत्यादिना प्रथमाग्निक्षेत्रस्य सप्तविधस्य साधनं श्रौतसूत्रे उक्तम्। अतोऽत्र द्वितीयादिषु अष्टविधाद्यग्निक्षेत्रेषु पुरुषाभ्युच्चयं वक्तुमुपक्रमते—

उत्तरेषु पुरुषोच्चयेनैकशतविधादित्येतद्व्याख्यामः ॥१॥

श्रौतसूत्रे (१६।८।१) सार्द्धसप्तपुरुषात्मकमग्निमुक्त्वा "उत्तरेषु पुरुषोच्चयेनैकशतविधात्" (१६।८।२०) इति यदुक्तम्, एतत्पुरुषोच्चयविधानं विविच्य कथयिष्यामः। उत्तरेषु द्वितीयादिषु चयनेषु एकशतविधान्तेषु एकैकपुरुषवृद्ध्या अग्निक्षेत्रं निर्मातव्यम्। तत्राद्योऽग्निः सार्द्धसप्तपुरुषक्षेत्रफलकः सप्तविधः। द्वितीयोऽष्टविधः, तृतीयो नवविधः, इत्याद्येकशतविधपुरुषपर्यन्तं पञ्चनवतिः। अश्वमेधे च द्वावन्यौ द्विगुण-त्रिगुणसंज्ञौ वक्ष्यमाणौ। एवं सप्तनवतिरग्निचयनभेदाः। एवं पुरुषोच्चयो य उक्तस्तं वक्ष्यामः (१) ॥ १ ॥

---

(१)। द्वितीयादिषु चयनेषु पञ्चनवतितमचयनं यावत्प्रतिचयमेकैकपुरुषवृद्ध्याऽग्निक्षेत्रस्य मानं कर्तव्यम्। प्रथमपुरुषे सार्द्धसप्तपुरुषप्रमाणमग्निक्षेत्रम्, द्वितीये अष्टपुरुषप्रमाणं, तृतीये नवपुरुषप्रमाणम्, एवं पञ्चनवतितमे चयने एकाधिकं शतं पुरुषा भवन्ति। अर्धपुरुषमानं तु सर्वत्राधिकमस्त्येव। इदमेव विशेषशब्देन अधिमानशब्देन च व्यवह्रियते। तस्यापि प्रतिचयनं स्वसप्तमभागेन वृद्धिर्भवत्येव। अन्तिमे चयने तस्याप्येकोत्तरशतं स्वसप्तमभागा भवन्ति। अग्निक्षेत्रवदेव द्वितीयादिषु चयनेषु वेदिप्रमाणमपि वर्द्धनीयम्। इष्टकानां च सर्वासां प्रमाणं वर्द्धनीयम्, न तु तासां सङ्ख्याधिक्यमाश्रित्य क्षेत्रपूरणम्।

तत्रादावाश्वमेधिकं चयनद्वयमाह—

आद्योऽग्निर्द्विगुणस्त्रिगुणो भवतीति सर्वसमासः ॥२॥

आद्यः प्रथमोऽग्निः सार्द्धसप्तपुरुषक्षेत्रफलको द्विगुणो द्विकरणया द्विगुणः, त्रिकरणया त्रिगुणश्च इत्येवं सर्वसमासः = सर्वस्य पक्ष-पुच्छसहितस्य क्षेत्रस्य समासः कर्त्तव्यः । अयमर्थः—सार्द्धसप्तपुरुषक्षेत्रफलकः, एवं पञ्चदशपुरुषात्मकः सार्द्धद्वाविंशतिपुरुषात्मकश्चाग्निर्भवितुमर्हति । तत्र आत्मादिविशेषविधानमाह—तत्र यथा पूर्वाग्नौ पुरुषचतुष्टयात्मक आत्मा निर्दिष्टः स च द्विपुरुषरज्ज्वा संभवितुमर्हति, तथाऽत्रापि द्विपुरुषरज्ज्वा निर्मितसमचतुरस्रस्य क्षेत्रस्यार्द्धरूपया द्विकरणया निर्मितं समचतुरस्रं क्षेत्रमष्टपुरुषात्मकं द्विगुणक्षेत्रस्य आत्मा भवितुमर्हति । एवं त्रिकरणया रज्ज्वा निर्मितं समचतुरस्रं द्वादशपुरुषात्मकं त्रिगुणक्षेत्रस्यात्मा भवितुमर्हति । अथ च आद्याग्नेः पक्षौ सपञ्चमांशपुरुषात्मकौ निर्दिष्टौ, तथाऽत्रापि तौ च पुरुषविस्तारेण सपञ्चमांशपुरुषदैर्घ्येण निष्पन्नौ; तथाऽत्रापि द्विगुणपुरुषपञ्चमांशयुतपुरुषद्वयतुल्यौ । एवं द्विगुण-त्रिगुणाग्नेरात्मादिविधानं च निष्पद्यते ॥ २ ॥

आद्योऽग्निर्द्विगुणस्त्रिगुण एकविर्ठ०शतिविधो वा" (का. श्रौ. २०।४।१५) इत्यश्वमेधे उक्तम् । तत्र द्विगुणत्रिगुणावग्नी उक्तौ । अथैकविंशतिविधमाह—

एकविर्ठ०शतिविधो भवतीति पुरुषाभ्यासः ॥ ३ ॥

अश्वमेधे "एकविर्ठ०शतिविधो भवति" इत्युक्तम् । तत्र पुरुषाभ्यासः कार्यः । प्राक्तनसप्तविधसार्धपुरुषात्मकेऽग्नौ एकैकपुरुषाभ्यासेनाष्टविधादिषु जायमानेषु चतुर्दशपुरुषाभ्यासेनैकविंशतिविधः सम्पादनीयः । तद्यथा—सार्धसप्तपुरुषात्मकेऽग्नौ एकपुरुषक्षेपेणाष्टविधः, द्विपुरुषाभ्यासेन नवविधः, त्रिपुरुषाभ्यासेन दशविधः, एवं क्रमेण एकैकपुरुषवृद्ध्या चतुर्दशपुरुषाभ्यासेन एकविंशतिविधोऽग्निर्भवति ॥ ३ ॥

पुरुषाभ्यासप्रकारमेवाह—

पुरुषाभ्यासे यावानग्निः सपक्षपुच्छविशेषस्तावत्समचतुरस्रं कृत्वा तस्मिन् पुरुषप्रमाणमवदध्यात् ॥ ४ ॥

पुरुषाभ्यासे कर्तव्ये यावान् पूर्वोक्तोऽग्निः सार्धसप्तपुरुषात्मकः सपक्षपुच्छविशेषः पक्षाभ्यां पुच्छेन विशेषेण = अधिमानेन च सहितः तत्प्रमाणं समचतुरस्रं नानाप्रमाणसमासविधिना कृत्वा तस्मिन् समचतुरस्रीकृतेऽग्नौ पुरुषप्रमाणं = पुरुषप्रमाणं क्षेत्रमवदध्यात् = नानाप्रमाणसमासविधिनैव प्रक्षिपेत्। एवं सार्द्धाष्टपुरुषात्मकं चतुरस्रं स्यात्। तद्यथा—सार्द्धसप्तपुरुषात्मकेऽग्नौ पुरुषचतुष्टयात्मकं समचतुरस्रं पुरुषद्वयरज्जुरूपकरणया निर्मितमात्मपदवाच्यम्। षडरत्निदीर्घं पञ्चारत्निविस्तृतं क्षेत्रद्वयं पक्षपदवाच्यम्। सार्द्धपञ्चारत्निदीर्घं पञ्चारत्निविस्तृतं क्षेत्रं पुच्छपदवाच्यम्। एतेषां योगेन सार्द्धसप्तपुरुषात्मकमग्निक्षेत्रं भवति। अतः पक्षरूपं दीर्घचतुरस्रद्वयं पूर्वोक्त प्रकारेण समचतुरस्रीकृत्य द्विकरणया द्वयमप्येकसमासेन समस्य, एवं पुच्छरूपदीर्घचतुरस्रमपि समचतुरस्रीकृत्य द्वयमपि आत्मरूप पुरुषचतुष्टयात्मकसमचतुरस्रेण तयैव दिशा समस्येत्। एवं निष्पन्नं समचतुरस्रं सार्द्धसप्तपुरुषात्मकं भवति। ततस्तस्मिन् समचतुरस्रे पुरुषप्रमाणं = पुरुषमात्रदैर्घ्यविस्ताराभ्यां निर्मितं समचतुरस्रमवदध्यात् = समस्येत् समस्य चतुरस्रीकुर्यात्, तदा साद्धाष्टपुरुषफलकं समचतुरस्रं भवितुमर्हति। एवमेकपुरुषाभ्यासो निष्पन्नः। एवमेव द्वित्र्यादिपुरुषाभ्यासप्रकारो बोध्यः ॥ ४ ॥

द्वितीये चयने कियान् पुरुषभागः प्रक्षिप्त इत्याशङ्कायां तत्र क्षिप्तं पुरुषमानं पृथग्दर्शयति—

समस्तं पञ्चदश भागान् कृत्वा द्वावेकसमासेन समस्येत्स पुरुषः ॥ ५ ॥

समस्तं = पुरुषाभ्यासविशिष्टं समचतुरस्रं सार्द्धाष्टपुरुषफलकं पञ्चदश भागान् समान् कृत्वा अर्थात् तिर्यङ्मानीं पार्श्वमानीं वा पञ्चदशधा विभज्य तत्तद्विभागान्तेभ्यः सूत्रप्रसारणेन पञ्चदशांशतिर्यङ्मानीकानि समचतुरस्रभुजपार्श्वमानीकानि पञ्चदश चतुरस्राणि उत्पाद्य तत्र द्वौ भागौ उक्तदीर्घपञ्चदशचतुरस्रे चतुरस्रद्वयमेकसमासेन समस्य समचतुरस्रीकुर्यात्, स पुरुषः = तत्पुरुषप्रमाणमित्यर्थः। अत्र पञ्चदशांशोऽष्टाङ्गुलविस्तारं विंशत्यधिकशताङ्गुलदीर्घं क्षेत्रं दीर्घचतुरस्रात्मकं भवति। तद् द्वयं समचतुरस्रीकृतपुरुषप्र-

माणं द्वितीयचयने वर्धते । आ एकशतविधादेवमेव पञ्चदशभागद्वयेन वृद्धिर्भवति । तद् द्वितीयचयनादौ पञ्चदशभागद्वयमर्धाष्टमविभागरूपं भवति तत्समचतुरस्रं पुरुषद्वयात्मकमवधेयम् । अतस्तत्करणी पुरुषः स्यादिति । अर्थात् एतादृशेन पुरुषप्रमाणेन "द्विपुरुषां रज्जुं मित्वा" इत्यादिना आद्यान्नौ आत्मादिनिर्माणवत् आत्मादिकं निर्मेयमिति । एवमेव द्वित्रादिपुरुषाभ्यासविशिष्टे सार्द्धनव-सार्द्धदशादिफलके समचतुरस्रेऽपि पुरुषप्रमाणमभ्युपगन्तव्यमिति ॥ ५ ॥

पुरुषप्रमाणस्य पृथग्दर्शने प्रयोजनमाह—

तस्य दशमेन पादमात्री भवति, पञ्चमेन बृहती ॥६॥

तस्य समचतुरस्रीकृतस्य पुरुषप्रमाणस्य दशमेन = दशमांशेन पादमात्री इष्टका स्यात् । पुरुषकरणी दशमो भागः पद्येत्यर्थः । करणीक्षेत्रफलशततमो भाग इति यावत् । पञ्चमेन = पुरुषकरणीपञ्चमभागेन क्षेत्रफलपञ्चविंशतिभागेन बृहती नामेष्टका स्यात् । पद्या-बृहत्योः कथनमन्यासामिष्टकानामप्युपलक्षणम् ॥ ६ ॥

पुरुषवर्द्धने द्वितीयं प्रकारमाह—

पुरुषं वा पञ्चमेनोभयतोऽपच्छिद्य पञ्च भागान्त्समस्य तृतीयं तृतीयं निर्हृत्य पुरुषप्रमाणेऽवदध्यादित्यपरम् ॥७॥

अथवा पुरुषं = पुरुषप्रमाणकं समचतुरस्रं पञ्चमेन = पञ्चमभागेन अपच्छिद्य विभज्य पुरुषप्रमाणकक्षेत्रस्य तिर्यङ्मानीं पार्श्वमानीं च पञ्चधा विभज्य पञ्चविंशतिं कोष्ठान् कृत्वा तन्मध्ये पञ्चभागान् पञ्चकोष्ठान् समस्य समचतुरस्रीकुर्यात् । ततः तृतीयं तृतीयं निर्हृत्य = पञ्चकरणीकृतं चतुरस्रं त्रिधा कृत्वा स्वतृतीयभागं तत्स्मात्स्वसमचतुरस्रादपहृत्य निष्काश्य शिष्टं भागद्वयं समचतुरस्रीकृत्य तस्मिन्पुरुषप्रमाणे क्षेत्रे समस्येत् नानाप्रमाणसमासविधिना समचतुरस्रीकुर्यात् । तत्समचतुरस्रं पुरुषप्रमाणकमभ्युपगन्तव्यम् । तस्य करणी पुरुषप्रमाणमित्यर्थः । सोऽष्टविधादौ पुरुषो भवति । अस्मिन्नपि पक्षे पुरुषक्षेत्रस्य पञ्चमो भागश्चतुर्विंशत्यङ्गुलविस्तारो विंशतिशताङ्गुलदीर्घश्च चतुरस्रो भवति । तस्माच्तृतीये भागे

निष्काशिते षोडशाङ्गुलविस्तारं विंशतिशताङ्गुलदीर्घं क्षेत्रं भवतीति तावदेवायाति। तस्य दशमेन पादमात्री पञ्चमेन बृहतीत्यत्रापि समानः ॥ ७ ॥

पुरुषं पञ्चदश भागान् कृत्वेत्यत्र पञ्चदशमो भागः कियान् भवतीति स्पष्टयितुमाह—

पञ्चदशभागोऽष्टाङ्गुलम् ॥८॥

पुरुषकरणयाः पञ्चदशो भागोऽष्टाङ्गुलात्मकः स्यात्। तद् द्वय षोडशाङ्गुलविपुलं विंशतिशताङ्गुलदीर्घं क्षेत्रम्। तदापे कृते पुरुषो वर्द्धितो भवति ॥ ८ ॥

वितस्त्यङ्गुलपदशब्दानां लोकप्रसिद्धानां मानमाह—

पञ्चारत्निर्द्विदशवितस्तिर्विंशतिशताङ्गुलः पुरुष इत्येतस्माद् द्वादशाङ्गुलं पदमिति च ॥९॥

पञ्चारत्नयो यस्य, दश वितस्तयो यस्य, विंशतिशतमङ्गुलानि यस्य स पुरुष इत्यरत्न्यादिमानमेतस्मात्पुरुषाद् ज्ञेयम्। पदं च द्वादशाङ्गुलमित्यपि ज्ञेयम् ॥ ९ ॥

पुरुषवर्द्धने तृतीयं प्रकारमाह—

पुरुषं वा सप्तमेनोभयतोऽपच्छिद्य सप्त भागान्त्समस्य सप्तमभागमङ्गुलं निर्हृत्य पुरुषप्रमाणेऽवदध्यादित्यपरम् ॥१०॥

अथवा पुरुषं = पुरुषप्रमाणकं समचतुरस्रक्षेत्रं सप्तमेन स्वसप्तमांशेन उभयतोऽपच्छिद्य विभज्य सूत्रप्रसारणेन एकोनपञ्चाशत् समकोष्ठान् निष्पाद्य तन्मध्ये सप्त भागान् पुरुषसप्तमांशरूपान् समस्य समचतुरस्रीकृत्य सप्तमभागमङ्गुलं निर्हृत्य = सप्तमभागेनाङ्गुलसप्तमांशेन सहितमङ्गुलमेकविंशतिशताङ्गुलदीर्घं क्षेत्रं समचतुरस्रीकृत्य=समसितसप्तमांशरूपसमचतुरस्रात् निष्काश्येत्यर्थः। शिष्टं समचतुरस्रीकृत्य तस्मिन् पुरुषप्रमाणके क्षेत्रेऽवदध्यात्= समस्य चतुरस्रीकुर्यात इत्यपरं पुरुषविधानम्। अयमर्थः। अङ्गुलसप्तमांशसहितां सप्तदश

ङ्गुलविस्तारां विंशतिशताङ्गुलदीर्घां भूमिं दार्घचतुरस्ररूपां समचतुरस्रीकृत्य सप्तमांशसहितमङ्गुलं तस्मात् सप्तमभागकृतचतुरस्रापनीय शेषं समचतुरस्रीकृत्य नानाप्रमाणसमासविधिना पुरुषप्रमाणक्षेत्रे आवपेत् । स वर्द्धितसार्द्धसप्तमांशः पुरुष इति । अस्मिन्नपि पक्षे पूर्वप्रकारद्वयोक्तमेवायाति । तथाहि—पुरुषक्षेत्रस्य सप्तमो भागोऽङ्गुलसप्तमभागयुक्तसप्तदशाङ्गुलविस्तारं विंशतिशताङ्गुलदीर्घक्षेत्रं, तस्मात् सप्तमभागेऽङ्गुलेऽपनीते षोडशाङ्गुलविस्तारं विंशतिशताङ्गुलदीर्घं क्षेत्रमवशिष्यत इति । तदशमांशेन पादमात्री भवतीत्याद्यपि समानम् । नवविधादिष्वप्येवमेव बोध्यम् ॥१०॥

अधिमानरूपाणामरत्निवितस्तीनां पुरुषे प्रक्षेपो न कार्य इत्याह—

नारत्निवितस्तीनाꣳ समासो विद्यते सङ्ख्यायोगात्॥११॥

अरत्निवितस्तीनां समासः = पुरुषमध्ये प्रक्षेपो नास्ति । अधिमानभूता या अरत्नि-वितस्तयः, तासां पृथग्वर्द्धनस्योक्तत्वात्पुरुषाणामेव वर्द्धनं, नारत्न्यादीनाम् । कुतः ? संख्यायोगात् = अष्टानवतिविधे चयने "चतुर्दशारत्नीन् दक्षिणे पक्ष उपदधाति चतुर्दशोत्तरे चतुर्दश वितस्तीः पुच्छ उपदधाति" इति श्रुत्याऽरत्न्यादिषु वर्द्ध नार्थसंख्यायोगः पृथगुच्यते । अतः सप्तविधे एकविंशतिविधेऽष्टानवतिविधे एकशतविधे पुंसामेवोच्चयो, नारत्न्यादीनामिति (१) ॥११॥

एकशतविधप्रकारदर्शनेऽष्टानवतिविधे एवाग्नौ तदधिक साधिमानपुरुषत्रयस्य विविच्य निवेशनमाह—

अथ त्रिपुषाꣳ रज्जुं मिमीते ताꣳ सप्तधा समस्यति तस्यै चतुरो भागानात्मन्नुप दधाति त्रान्पक्षपुच्छेषु ॥१२॥

त्रिपुरुषां = त्रिपुरुषमितफलसाधनकां रज्जुं मित्वा तया रज्ज्वा त्रिपुरुषफलकं चतुरस्रं विधाय तत् सप्तधा विभज्य चत्वारो भागा अष्टनवतिविधाग्नेरात्मनि षट्पञ्चाशत्पुरुषात्मके पक्षेप्याः । एकैको

(१) अत्र रामचन्द्रवाजपेयिनः—ये त्वेतसूत्रार्थमजानन्तः शुद्धपुरुषमात्रवृद्धिमाहुः, ते श्रुतिं विप्लावयन्ति इत्युपेक्ष्याः । न ह्यनेन सूत्रेणाधिमानस्य वृद्धिरेव निषिध्यते, किन्तु पुरुषमध्ये क्षेपमात्रं निषिध्यते, पृथग्वर्धनं तु स्यादेवेति ।

भागः अरत्निवितस्तिरहिते चतुर्दशपुरुषात्मके अष्टानवतिविधाग्नेः पक्षपुच्छे क्षेप्यः। एवं सति पुरुषसप्तमांशेन पञ्चगुणेन सहितः सप्तपञ्चाशत्पुरुषा एकशतविधाग्नेरात्मा भवति। पुरुषसप्तमांशेन त्रिगुणेन सहितश्चतुर्दशपुरुषः प्रत्येकं पक्षौ पुच्छश्च भवति। एवं सर्वयोगेन एकशतपुरुषात्मक एकशतविधोऽग्निः। ततः पक्षपुच्छेषु स्वकीयारत्निवितस्तिवर्द्धनेन अष्टोत्तरशतपुरुषात्मक एकशतविधोऽग्निर्भवतीति अरत्निवितस्तिवर्द्धनं पृथगुक्तम् ॥१२॥

इति शुल्ववृत्तौ पुरुषोच्चयनिरूपणी पञ्चमी कण्डिका ॥५॥

यथाऽग्निवेदीष्टकाप्रमाणं वर्द्धत इत्येतद्व्याख्यामः ॥१॥

"यथाऽग्नि वेदीष्टकाप्रमाणं (१६।८।२१) इति यत् श्रौतसूत्रे उक्तं, तद्व्याख्यामः = वृद्धिप्रकारं कथयिष्याम इत्यर्थः। कल्पसूत्रस्यायमर्थः। वेदिश्च इष्टकाश्च वेदीष्टकाः, तासां प्रमाणं यथाऽग्नि = अग्निमानमनतिक्रम्य अग्निक्षेत्रप्रमाणं यथा वर्द्धते तथा वेदि प्रमाणमिष्टकाप्रमाणं च वर्द्धते। वेदिवृद्धिं विना वर्द्धितस्याग्नेर्मानासंभवात्। अवर्द्धिताश्चेष्टका वर्द्धितमग्निक्षेत्रं न पूरयन्ति इति वेदेरिष्टकानां च यथाऽग्नि वर्द्धनं भवति ॥१॥

वेदिवर्धनं प्रक्रमवर्धनेनैव भवतीति चरमे चयने प्रक्रममाह—

या करणी चतुर्दश प्रक्रमान्त्संक्षिपति त्रींश्च प्रक्रमसप्तम भागान्त्स एकशतविधे प्रक्रमः ॥ २ ॥

या करणी चतुर्दश क्षेत्राणि, त्रीन् = त्रिगुणितान् प्रक्रमसप्तम भागान् प्रक्रमपरिमितक्षेत्रसप्तमांशांश्च सङ्क्षिपति एकीकरोति समचतुरस्रीकरोति तादृशकरणीरूपः प्रक्रम एकशतविधेऽग्नौ अन्तिमे चयने बोध्यः (१)। तत्साधनप्रकारो यथा—प्रक्रमद्वय

(१) इष्टकानिर्माणप्रकारः। पूर्वं यजमानेनोर्ध्वबाहुना प्रपदोच्छ्रितेन वा समं वंशं मिनुयात् स पुरुषः। तस्य पुरुषप्रमाणस्य द्वात्रिंशांशं तत्र वर्धयित्वा वंशं तावत्प्रमाणं कुर्यात्। "हसते पाकशोषाभ्यां द्वात्रिंशद्भागमिष्टका। तस्मादार्द्रप्रमाणं तु कुर्यान्मानाधिकं बुधः" इति श्लोकशुल्बे वचनादार्द्राणामिष्टकानां पाकात् शोषाच्च द्वात्रिंशांशो ह्रासो भवति। "इष्टका पाक-शोषाभ्यां

त्रैंशन्मात्रा तु हीयते" (का० शु० कं० ९ सू० २३) इति वचनान्तराच्च पुरुषे पुरुषद्वात्रिंशांशं वा त्रिंशांशं वा वर्द्धयित्वा इष्टकायन्त्रनिर्माणं कुर्यात्। रामचन्द्राजपेयिनस्तु " अयं द्वात्रिंशांशह्रासः पादभागाविषयः। तेन पद्यायां द्वौ द्वात्रिंशौ, जङ्घामाव्यां त्रयो द्वात्रिंशांशाः, बृहत्यां वक्रासु च चत्वारो द्वात्रिंशांशा वर्द्धनीयाः। एवमर्द्धबृहतीनां त्रिग्राहिण्यां च ह्रासादिकमूह्यमित्याहुः। ततस्तं वंशं दशधा विभज्य चिन्हानि कुर्यात्। एवं तस्य वंशस्य दशमो भागः पदसंज्ञको भवति, पदस्य द्वादशांशोऽङ्गुलमिति। अत्रेष्टकाश्चतुर्दशविधा भवन्ति। पद्या, अर्द्धपद्या, पादोनपद्या, जङ्घामात्री, अध्यर्द्धा, अर्द्धोत्सेधा पद्या, अर्द्धोत्सेधा अर्द्धपद्या, पादभागा, त्रिग्राहिणी, अर्धपादभागा, बृहती, वक्रा, अर्द्धबृहती, चतुर्भागा, इति। तत्र द्वादशाङ्गुलसमचतुरस्राः पद्याः, द्वादशाङ्गुलदीर्घाः षडङ्गुलविस्तृताः अर्द्धपद्याः, द्वादशाङ्गुलसमचतुरस्राः एकेन पादेन (कोणेन) न्यूनाः = त्रुटिताः पादोनपद्याः, अष्टादशाङ्गुलसमचतुरस्रा जङ्घामाव्यः, अष्टादशाङ्गुलदीर्घा द्वादशाङ्गुलविस्तृता अध्यर्द्धाः, द्वादशाङ्गुलसमचतुरस्रास्त्र्यङ्गुलोच्चा द्व्यङ्गुलोच्चा वा अर्द्धोत्सेधापद्याः, द्वादशाङ्गुलदीर्घाः षडङ्गुलविस्तृतास्त्र्यङ्गुलोच्चा द्व्यङ्गुलोच्चा वा अर्द्धोत्सेधा अर्द्धपद्याः, षडङ्गुलसमचतुरस्राः पादभागाः, चतुर्विंशत्यङ्गुलदीर्घाः अष्टादशाङ्गुलविस्तारास्त्रिग्राहिण्यः, षडङ्गुलदीर्घास्त्र्यङ्गुलविस्तृता अर्द्धपादभागाः, चतुर्विंशत्यङ्गुलसमचतुरस्रा बृहत्यः, चतुर्विंशत्यङ्गुलदीर्घा द्वादशाङ्गुलविस्तृता अर्द्धबृहत्यः, त्र्यङ्गुलसमचतुरस्राश्चतुर्भागा इति। उच्चता तु षडङ्गुलमिता सर्वासां चतुरङ्गुलमिता वा। अर्धोत्सेधापद्याऽर्द्धोत्सेधार्द्धपद्ययोस्तु द्व्यङ्गुलं त्र्यङ्गुलं वोच्चत्वम्। वक्राणां प्रमाणसाधनोपायस्त्वेवम्। पूर्वमर्द्धव्यामेन व्याममात्रप्रमाणं वृत्तं विलिख्य तन्मध्ये चतुर्विंशत्यङ्गुलं समचतुरस्रं साधयित्वा तस्य कोणेषु कोणादारभ्य वृत्तं यावद्रेखाः कुर्यात्, एवं चतुरस्रस्य दिश आरभ्य वृत्तं यावत् रेखा दद्यात्, एवं कृते अष्टौ वक्रा विभागा जायन्ते। एतादृशं क्षेत्रं विलोक्य वक्रादारुघटनेन वकेष्टकानां प्रमाणं निष्पादनीयम्। सर्वासु इष्टकासु अङ्गुलिकाष्टादिना त्रीणि त्रीणि चिन्हानि कार्याणि। तानि च चिन्हानि वक्राणि, ऋजूनि, तिरश्चालिखितानि च तासु तास्विष्टकासु कार्याणि। तत्र वक्राणि चिन्हानि ⌣ ⌣ ⌣ एतादृशानि भवन्ति। ऋजूनि ।।। एतादृशानि, तिरश्चालिखितानि च ---एतादृशानि कार्याणि। अथेष्टकानां संख्या—तत्र एकादश सहस्राणि एकशतं च सप्तत्यधिकं समग्रा इष्टकाः १११७०। तत्र दश सहस्राणि अष्टौ शतानि च लोकम्पृणाः १०८००। त्रीणि शतानि सप्तत्यधिकानि यजुष्मत्यः। (शतपथे तु दर्भस्तंब-दूर्वेष्टका-स्वयमातृण्णा-कूर्मोलूखलाद्याः त्रिंशत्संख्या इष्टका आसां मध्येऽधिकाः पठित्वा त्रीणि शतानि पञ्चनवतिर्यष्टसप्तत्य उक्ताः। एताः पञ्चविंशतिरिष्टकास्तिस्रो नैर्ऋत्यश्चोक्तसंख्यातोऽधिकाः)। इष्टकानां मध्ये नव सहस्राणि द्वे शते द्वाषष्ट्यधिके ९२६२ पादभागाः तत्र वक्राङ्कितास्तु पादभागाः १७३२, ऋजुरेखालिखिताः पादभागाः ७५३०। अर्द्धपादभागाः

तिर्यङ्मानीकं सप्तप्रक्रमपार्श्वमानीकं दीर्घचतुरस्रं चतुर्दशप्रक्रमफलकं निर्माय तत्समचतुरस्रीकुर्यात् । तेन चतुर्दशफलकं समचतुरस्रं स्यात् । एवं त्र्यङ्गुलसप्तमांशयुतपञ्चदशाङ्गुलविस्तारं षट्त्रिंशदङ्गुलदीर्घचतुरस्रं प्रक्रमक्षेत्रस्य त्रिगुणितसप्तमांशरूपं समचतुरस्रीकुर्यात् । ततोऽनयोः समचतुरस्रयोः समासे या करणी सा चतुर्दश प्रक्रमान् त्रींश्च प्रक्रमसप्तमभागांश्च सङ्क्षिपति । अतः सैव करणी एकशतविधेऽग्नौ प्रक्रमः (१) ॥ २ ॥

षट् शतान्यष्टसप्तत्यधिकानि । तत्र—वक्रालिखिता अर्द्धपादभागाः २६२, ऋज्वालिखिता अर्द्धपादभागाः ४१६ । चतुर्भागा द्वादश । तत्र वक्रालिखिताश्चत्वारः, ऋज्वालिखिता अष्टौ । पद्याः सप्तशतानि सप्तसप्तत्यधिकानि । तत्र—पूर्णोत्सेधाः पद्याः ७५९, अर्द्धोत्सेधाः पद्याः १८ । अर्द्धपद्या अष्टाशीतिशतम् । तत्रार्द्धोत्सेद्या द्वादश । तत्र चतस्रस्तिरश्चालिखिताः, अष्टौ ऋज्वालिखिताः । तिरश्चालिखिताः सप्तविंशतिः । तासां मध्ये चतस्रोऽर्द्धोत्सेधाः, त्रयोविंशतिः पूर्णोत्सेधाः । शेषा ऋज्वालिखिताः, वक्रालिखिते अर्धपद्ये द्वे इति । जङ्घामाश्यः ५०, त्रिग्राहिण्यः ७०, वक्राः ८, अध्यर्द्धाः १११, बृहत्यः ६ वा ७, अर्द्धबृत्यः ४, पादोने २ इति ।

इयमिष्टकानां सङ्ख्या उपधानकालीना । निष्पादनकाले सर्वा इष्टका उक्तसङ्ख्यातोऽधिकाः कारयितव्याः । यथा भेदनादिनाऽल्पा न भवेयुः ।

(१) अयमर्थः—त्रिपदकरणीकसमचतुरस्रस्य यः सप्तमोंऽशः षट्त्रिंशदङ्गुलायामोऽङ्गुलसप्तमांशसहितपञ्चाङ्गुलविस्तारो भूभागः कृतः, पञ्चदशाङ्गुलानि त्रिसप्तमभागयुतानि विस्तारे षट्त्रिंशदङ्गुलान्यायामे भवन्ति । तं चतुरस्रीकृत्य या करणी चतुर्दशगुणं त्रिपदकरणीकं संक्षिपति तत्करणीके चतुरस्रे नानाप्रमाणसमासविधिना तं प्रक्षिपेत् । तत्क्षेत्रस्य करणी एकशतविधे चयने प्रक्रमवाच्या । तेन प्रक्रमेण प्रकृतिवद्वेदिः साध्या । स चान्तिमचयनप्रक्रमः, किंचिदूनसप्तत्रिंशदधिकशताङ्गुलप्रमितो भवति । तच्चैवं विधेयम् । पूर्वमभिक्षेत्रं सार्द्धसप्तपुरुषात्मकं समचतुरस्रीकृतं स्वसप्तमभागेन द्वितीयचयने वर्द्धयेत् । एवं तृतीयादिष्वपि एकैकीच्चयेन स्वसप्तमभागवृद्धिः । तृतीये द्वौ सप्तमभागावधिकौ, चतुर्थे त्रयः, पञ्चमे चत्वारः, षष्ठे पञ्च, सप्तमे षट् । अष्टमे प्रथमक्षेत्रस्य द्विकरणी । एवं क्रमेण पञ्चनवतितमे चयने चतुर्णवतिः सप्त भागाः वर्द्धन्ते । तत्साधनोपायस्तु—प्रथमे चयने पदुयाप्रमाणेन पृथक् चतुर्दश चतुरस्राणि संसाध्य तानि नानाप्रमाणसमासविधिना एकीकृत्य चतुर्दशकरणीकमेकं चतुरस्रं साधयेत् । ततः पदुयाप्रमाणक्षेत्रं सप्तधा विभज्य तस्य त्रीन् भागान् समस्य=चतुरस्रं कृत्वा तत्सप्तमभागत्रयसाधितं चतुरस्रं चतुर्दशकरणीके चतुरस्रे नानाप्रमाणसमासविधिनाऽऽवपेत् । तदावापे कृते यावच्चतुरस्रं जायते सैकशतविधे पदुयाभिर्दक्षिणोत्तरं पूर्वापरं वा पङ्क्तिस्था-

एवमेकशतविधे प्रक्रमप्रमाणमुक्त्वा द्वितीये चयने प्रक्रमप्रमाण माह—

द्वितीये वा सप्तसु प्रक्रमेषु प्रक्रममवधाय तस्य सप्तम भागेन प्रक्रमार्थः ॥ ३ ॥

द्वितीयेऽष्टविधेऽग्नौ सप्तसु प्रक्रमेषु प्रक्रमपरिमितकरण्या निर्मितेषु सप्तसु समचतुरस्रेषु एकं प्रक्रमम् = एकप्रक्रमक्षेत्रफल मवधाय प्रक्षिप्य समस्य समचतुरस्रीकृत्य तादृशस्य प्रक्रमस्य सप्तमभागेन प्रक्रमार्थः कार्यः । अर्थात् तस्य समचतुरस्रस्य सप्तमभागेन सप्तमांशेन अतिदीर्घचतुरस्रेण यत्समचतुरस्रं स प्रक्रमः । अर्थात् तस्य क्षेत्रस्य करणीरज्जुर्द्वितीयेऽष्टविधेऽग्नौ प्रक्रमो बोध्यः (१) । तेनेदं फलितम् । आद्येऽग्नौ यस्त्रिपदः प्रक्रमः, तत्र तस्यैव प्रक्रमस्य सप्तमांशवर्द्धनेन द्वितीयस्याग्नेः प्रक्रमः । एवं द्विगुणितप्रक्रमसप्तमांशवर्द्धनेन नवविधेऽग्नौ प्रक्रमः । एवं त्र्यादिगुणितसप्तमांशवर्द्धनेनैव दशविधाद्यग्नौ प्रक्रमो बोध्य इति (२) ॥ ३ ॥

एवं द्वितीये चयने प्रक्रमवर्द्धनमुक्त्वा पुनरपि तदर्थं प्रकारान्तरमाह—

प्रक्रमेण वा ससप्तमभागेन प्रक्रमार्थः ॥४॥

पिताभिरेकः पुरुषः । एवंविधेन पुरुषेण द्विपुरुषां रज्जुं मित्वेत्यादिकल्पोक्त विधिनाऽऽत्मपक्षपुच्छादिकं साध्यम् । एवं विधाभिस्तिसृभिः पद्याभिः पूर्वापरस्था पिताभिरेकः प्रक्रम इति ।

(१) महीधरः । "अयमर्थः—त्रिपदप्रक्रमक्षेत्रं सप्तधा विभज्य स्वसप्तभागं चतुरस्रीकृत्य प्रक्रमक्षेत्रे आवपेत् नानाप्रमाणसमासविधिना । ततः सप्तमांशाधिकप्रक्रमक्षेत्रकरण्या द्वितीयचयने प्रक्रमकार्यं कर्तव्यम् । नवविधे तृतीये चयने प्रक्रमक्षेत्रस्य द्वौ सप्तमभागौ प्रक्रमक्षेत्रमध्ये प्रक्षेप्यौ, चतुर्थे त्रयः, पञ्चमे चत्वारः, षष्ठे पञ्च, सप्तमे षट् , अष्टमे चयने प्रक्रमक्षेत्रद्विकरण्या समचतुरस्रं कृत्वा तस्य सप्तमो भागः प्रक्रमक्षेत्रमध्ये आवपनीयः । चतुर्थे द्विकरण्या साधितस्य सप्तमो भागः, पञ्चमे चतुःकरण्या साधितस्य सप्तमो भागः, षष्ठे पञ्चकरण्या साधितस्य सप्तमो भागः, सप्तमे षष्ठकरण्या साधितस्य सप्तमो भाग इत्यादि" ।

(२) अयमर्थः—त्रिपदप्रक्रमप्रमाणानि सप्त समचतुरस्राणि समस्यैकं समचतुरस्रं कृत्वा तत्र त्रिपदप्रक्रमचतुरस्रमावपेत् । ततस्तस्य वर्द्धितक्षेत्रस्य यः सप्तमो भागः, तं समचतुरस्रीकृत्य तत्करण्या प्रक्रमकार्यं द्वितीये चयने विधेयम् ।

यद्वा सप्तमभागसहितेन प्रक्रमेण प्रेक्रमकार्यं द्वितीये चयने कार्यम् ॥ ४ ॥

एवमेवैकशतविधात् ॥५॥

यथाऽष्टविधे द्वितीयचयने एकसप्तमांशवृद्धिरुक्ता। एवम् आ एकशतविधात् नवविधादेकशतविधचयनपर्यन्तं द्वित्र्यादयोऽभ्यस्तसप्तमांशाः प्रक्रमक्षेत्रे वर्धनीयाः ॥ ५ ॥

अन्तःपात्य–गार्हपत्ययोर्वृद्धिं प्रतिषेधति—

नान्तःपात्यगार्हपत्ययोर्वृद्धिर्भवति तावदेव योनिर्भवति न व जातं गर्भं योनिरनुवर्द्धत इतिश्रुतेर्वृद्धेरत्यन्तप्रतिषेधः ॥६॥

अन्तःपात्यगार्हपत्ययोर्वृद्धिर्न भवति। उख्याग्निस्थाने कृता व्याममात्रविस्तारा मण्डलाकारा गार्हपत्यचितिर्गार्हपत्यशब्देनोच्यते। तस्मात्पूर्वभागे वेद्यन्तपर्यन्तं प्रक्रमत्रयपरिमितो भूभागोऽन्तःपात्यशब्देनोच्यते। अत्र चयने प्रक्रमस्त्रिपदः। तयोर्द्वितीयादिचयनेषु अग्निक्षेत्रवेदीष्टकावत् वृद्धिः प्राप्ता, सा निषिध्यते। कुतः ? तावदेव योनिर्भवति। अन्तःपात्यसहिता गार्हपत्यचितिः श्रुतावग्नेर्योनित्वेनोक्ता। तावत्क्षेत्रं योनिर्भवति। भवतु योनिस्तथापि वृद्धिः कथं वार्यत इत्याह– न वै जातमिति। जातं गर्भमनु = गर्भोत्पत्तेः पश्चात् योनिर्न वर्द्धते। यावद्योनौ गर्भः स्थितस्तावद् गर्भवृद्ध्यनुसारेण योनिर्वर्द्धते। गर्भोत्पत्यनन्तरं गर्भ एव वर्द्धते न योनिः, इति श्रुत्या उक्तत्वात् अन्तःपात्य—गार्हपत्यचित्योरत्यन्तं वृद्धिप्रतिषेधः ॥ ६ ॥

तुल्यप्रमाणानां द्वित्रादिपरार्द्धपर्यन्तानां समचतुरस्राणां द्विकरणयाद्युपायेन समासविधिरुक्तस्तस्य दुष्करत्वात्सुगमोपायेन करणीमाह—

यावत्प्रमाणानि समचतुरस्राण्येकोकर्तुं चिकीर्षेदेकोनानि तानि भवन्ति तिर्यगद्विगुणान्येकत एकाधिकानि त्र्यस्रिर्भवति तस्येषुस्तत्करोति ॥ ७ ॥

यावत्प्रमाणानि यावत्सङ्ख्याकानि समचतुरस्राणि समानानि

वतुरस्राणि = एकीकर्तुमिष्टानि एकोनानि एकरहितसंख्याकानि, तानि द्विगुणानि कृत्वा एकपङ्क्तौ तथा स्थापयेत् यथा सर्वेषामाधार-रेखा एकरेखायां स्युः । ततस्तां सर्वाधारयोगरूपरेखां तिर्यङ्मानीं कुर्यात् । एवं एकाधिकानामिष्टसंख्याकचतुर्भुजानां च एकपङ्क्तौ थापनेन या योगरूपाऽऽधाररेखा तत्प्रमाणौ भुजौ कुर्यात् । एवमाभ्यां भुजाभ्यां तस्यां तिर्यङ्मानीरूपाधाररेखायां यत् त्र्यस्रिक्षेत्रं भवति तस्य इषुः भुजद्वययोगजातशीर्षकोणबिन्दोः आधाराद्धं यावत् तम्बसूत्रस्यार्द्धं, सा करणी भवति, तया करण्या कृतं समचतुस्रमभी-ष्टचतुरस्राणि समस्यति ।

अत्र आधाराग्रबिन्दुद्वयलम्बाद्धर्बिन्दुगतवृत्ते विहिते आधारो ज्यारूपः, लम्बार्धं तु शररूपम्, इत्यतो लम्बाद्धर्बस्य इषुत्वमन्वर्थ-कमिति ध्येयम् ॥ ७ ॥

यूपैकादशिन्यां वेदिवर्द्धनं वक्तुं प्रतिजानीते—

यथायूपं वेदिवर्धनमित्येतद्व्याख्यामः ॥ ८ ॥

"यथायूपं वेदिवर्द्धनम्" (८।८।२१) इति यत्कल्पकारेणोक्तं तद्व्याख्यामः वेदिवर्धनविधिं कथयामः । "यूपैकादशिनी चेद्रथाक्षं तावत्प्रायन्तराणि, पूर्वार्धं वा समं विभज्य" (८।८।७) इति एकादशयूपानां स्थानान्युक्त्वोक्तं 'यथायूपं वेदिवर्द्धनम्' इति । यथायूपशब्देन वेदेः पूर्वभागे द्वादशाङ्गुलवृत्तरूपमेकादशयूपानां स्थौल्यमुच्यते । "चतुःशतमक्षः" (२।३) इति शुल्बकृता उक्तत्वात् चतुरधिकशताङ्गुलप्रमितानि रथाक्षमात्राणि । दश यूपान्तरालानि च यथा भवन्ति तथा वेदिः कर्त्तव्या । वेदिवर्धनं विना "अन्तर्वेदि क्रमेनोति" (का. श्रौ. ६।२।८) इत्ययमर्थोऽन्यथा कृतः स्यात्, कतिपय यूपानां वेद्यसंस्पर्शात् (१) ॥ ८ ॥

---

(१) अयं भावः ज्योतिष्टोमे कल्पकारेण एकः पशुः, ऐकादश वा पशवो विहिताः । एकादशपशुपक्षेऽपि एकस्मिन्यूपे एकादशानां पशूनां नियोजनम्, एकादशसु यूपेषु वेति पक्षद्वयमुक्तम् । तत्र यूपैकादशिनीपक्षे वेदेः पूर्वभागं चतुर्विंशत्यरत्निमितमेकादशधा समं विभज्य तत्रैकादश यूपान्निखनेदित्येकः पक्षः । प्रतियूपं रथाक्षमानानि चतुरधिकशताङ्गुलमितानि दशसङ्ख्याकानि यूपान्तरालानि कृत्वा तत्र एकादश यूपान्निखनेदिति द्वितीयः पक्षः । तत्र पूर्वार्द्धसम-विभागपक्षे वेदिवृद्धिर्न भवति ।

वेदिवद्धर्धनं प्रतिज्ञातं, तच्च प्रक्रमसाध्यम्। अतो यूपैकादशिन्यां यूपानां रथाक्षमात्रान्तरालपक्षे वेदिसाधनार्थं प्रक्रमप्रमाणमाह—

या रज्जुरेकादशोपरवान्त्संक्षिपति दश च रथाक्षांस्तस्या यश्चतुर्विंठ०शो भागः स प्रक्रमः ॥ ९ ॥

या रज्जुरेकादश संख्याकानुपरवान् = यूपगर्तान् द्वादशाङ्गुलप्रमाणान्, तथा दश रथाक्षान् = चतुरधिकशताङ्गुलप्रमितानि दशसंख्याकानि यूपान्तरालानि च संक्षिपति = मिनोति, एतावदायता रज्जुः पञ्चविंशत्यङ्गुलाधिकाऽष्टाचत्वारिंशदरत्निमिता भवति। तस्या यश्चतुर्विंशो भागः तृतीयभागसहितमेकमर्द्धाङ्गुलं द्वावरत्नी, स प्रक्रमः = यूपैकादशिन्यामेतावत् प्रक्रमप्रमाणमित्यर्थः ॥ ९ ॥

तेन वेदिमानं कुर्यादित्याह—

तेन वेदिं निर्माय द्वादशाङ्गुलं पुरस्तादपच्छिद्य तद्यूपावट्याच्छङ्कोः पुरस्तात्प्राञ्चमवधाय तस्मिन्यूपान्मिनोति ॥ १० ॥

तेन वर्द्धितप्रमाणेन पूर्वोक्तेन प्रक्रमेण वेदिं निर्माय "षट्त्रिंशत्प्रक्रमा प्राची" (का. श्रौ. ८।३।८) इत्यादिविधिना विरच्य पुरस्ताद् = वेदेः पूर्वभागे द्वादशाङ्गुलं = द्वादशाङ्गुलप्रमाणविस्तारमपच्छिद्य = अर्थात् वेदिपूर्वभागेशानकोणादारभ्याग्नेयकोणपर्यन्तं द्वादशाङ्गुलविस्तारं द्वासप्तत्यधिकैकादशशताङ्गुलमितदीर्घमतिदीर्घचतुरस्ररूपं दक्षिणोत्तरायतं वेदिक्षेत्रं छित्वा तं छिन्नं भागं यूपावट्यात् = यूपावटे गर्ते भवो यूपावट्यः, तस्मात् शङ्कोः प्राञ्चं = पूर्वापरायतमवधाय = संयोज्य तस्मिन् = छिन्ने = पूर्वापरतया संयोजिते वेदिभागे रथाक्षमात्रान्तरालान् गर्तान् खात्वा तेषु प्राक्संस्थान् यूपान् मिनोति। एवं कृते एकादशापि यूपा वेद्यन्तरे निवेशिताः स्युः, प्राची च यूपपङ्क्तिः कृता भवति इति पूर्वपक्षः ॥ १० ॥

सिद्धान्तमाह—

पार्श्वयोर्वाऽर्द्धमन्तर्वेदीति श्रुतेरर्धकान् ॥ ११ ॥

वाशब्दः पूर्वपक्षं व्यावर्तयति । पार्श्वयोः = यूपावट्यशङ्कोर्दक्षिणोत्तरपार्श्वयोरर्धकान् = अर्धार्धान् पञ्च पञ्च यूपान् मिनुयात्, न पूर्वभागे । पार्श्वयोरर्धकानित्युक्ते मध्यमे यूपावटे प्रथमोऽर्थात्सिद्धः । एवमेकादश यूपान् दक्षिणोत्तरपङ्क्त्या मिनुयात् । एवं च पूर्वोक्तो वेद्यपच्छेदो न कार्यः । कुतः? अर्धमन्तर्वेदीति श्रुतेः । यूपस्यार्द्धमन्तर्वेदि, अर्द्धं बहिर्वेदि भवति इति शाखान्तरश्रुतेः । यूपगतौ द्वादशाङ्गुलवृत्तः । स च गर्तोऽर्द्धं वेद्यां निखातव्योऽर्द्धं बहिः । एवं कृते वेदिवर्द्धनं सार्थकं भवति, एकादश यूपानां वेदिस्पर्शश्च स्यात् । पूर्वपक्षसूत्रे कथिता प्राची यूपपङ्क्तिस्तु तीव्रसुति यागे भवति (१) ॥ ११ ॥

मतान्तरमाह—

एके प्रथमौ प्रकृतिवत् ॥ १२ ॥

एके आचार्याः प्रथमोत्तमौ = आद्यन्तौ यूपौ प्रकृतिवत् = वेदिगतार्द्धौ कार्यौ, नव अन्ये बहिर्वेदि कार्या इतीच्छन्ति । अतो विकल्पः ॥ १२ ॥

वर्द्धितावर्धितयूपैकादशिन्या वेदेर्नामधेयमाह—

सैषा शिखण्डिनी वेदिर्भवति ॥ १३ ॥

सा एषा यूपैकादशिनीयुक्ता वेदिर्वर्द्धिताऽप्यवर्द्धिताऽपि शिखण्डिनीत्युच्यते ॥ १३ ॥

इति वेदीष्टकावृद्धिनिरूपणी षष्ठी कण्डिका ॥ ६ ॥

भवन्ति चात्र श्लोकाः ॥ १ ॥

अत्र सूत्रोक्तेऽर्थे श्लोका अपि केचन सन्ति शुल्बकारकृता एव ॥१॥ ते यथा—

द्विहस्ते लक्षणं कुर्यात्त्रिहस्तो मध्यमः शिरः ॥
शिरः पञ्चाद्वितस्तिः स्यात्पूर्वार्धे हस्त एव च ।
सार्धहस्ते च पाशः स्याद्वेदिः स्यात्पौर्णमासिकी ॥ २ ॥

---

(१) अस्ति तीव्रसुदभिधानः कश्चिद्यागः । तत्र यूपैकादशिनीपक्षे यागान्तरवदक्षिणोत्तरा यूपपङ्क्तिर्न भवति, किन्तु पूर्वापरायता भवति । तथाऽग्निष्टुद्यागान्तर्वेद्यर्द्धगतो भवति । अन्ये तु बहिर्वेदिगता वचनाद्भवन्ति । अतश्च तदर्थमपि वेद्यपच्छेदो न कार्य इति रामचन्द्रवाजपेयिप्रभृतयः ।

संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः ।
समभूमौ भवेद्विद्वान् शुल्ववित् परिपृच्छकः ॥ ३ ॥

संख्याप्रतिपादकं गणितशास्त्रं, तज्ज्ञः । परिमाणं मानविधिः, तज्ज्ञः । समसूत्रेणाकर्षणकर्ता । परिपृच्छकः शिल्पादीनाम् ॥३॥

न जलात्सममन्यत् स्यान्नान्यद् वृत्तात्प्रभा भवेत् ।
नान्यद् दूरं भ्रमादूर्ध्वं नान्यत्सूत्राद्ऋजु र्भवेत् ॥ ४ ॥

शतयोजनस्थमप्यभ्रान्तानां न दूरम् । यथा भ्रान्तिगोचरीकृतमासन्नमपि दूरम् ॥४॥

तिर्यङ्मान्याश्च सर्वार्थैः पार्श्वमान्याश्च योगवित् ।
करणीनां विभागज्ञो नित्योद्युक्तश्च कर्मसु ॥ ५ ॥

सर्वार्थैः = सर्वप्रयोजने करणीनां करणीतत्करणयत्क्षणयादीनाम् ॥५॥

शास्त्रबुद्ध्या विभागज्ञः परशास्त्रकुतूहलः ।
शिल्पिभ्य स्थपतिभ्यश्चाप्यादद्दीत मतीः सदा ॥ ६ ॥

षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितम् ।
जरठं चाव्रणं चैव शङ्कुं कुर्याद्विचक्षणः ॥ ७ ॥
द्वितस्तिप्रमाणस्तु खादिरो मुद्गरस्तथा ।
शङ्कुस्तेन निखातव्यस्तस्मात्तस्य परिग्रहः ॥ ८ ॥

षडङ्गुलद्वादशाङ्गुलयोर्विकल्पोऽल्पबृहत्क्षेत्रसाधनव्यवस्थितः परिणाहोऽधःशिरा, विस्तारो वा । जरठं दृढम् ॥८॥

एकतक्ष ऋजुस्तीक्ष्णः खादिरः सम आयतः ।
शङ्कुः कार्यस्तु शुल्वज्ञैस्तस्यार्धं गमयेन्महीम् ॥ ९ ॥

एकत एव तक्षणेन सूक्ष्मीकरणार्थं तनूकृतः । खादिर इति सारकाष्ठोपलक्षणार्थम् । अर्धमिति दृढ़स्थितियोग्यतोपलक्षणार्थम् ॥९॥

प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः ।
शङ्कुरामशिराः कार्यस्तस्याप्यर्धं निखापयेत् ॥१०॥

आमशिरा आर्द्रशिराः ॥१०॥

चतुरस्रं मुद्गरं तत् षोडशाङ्गुलमायतम् ।
अविद्धं क्रमणीयं च दारुमध्याच्च निर्मितम् ॥११॥

अविद्ध काष्ठान्तरेणाप्रोतम् । क्रमणीयं शङ्कुहननरूपक्रमणार्हम् ॥११॥

अजीर्णा ग्रथिनी सूक्ष्मा सभा श्लक्ष्णा त्वरोमशा ।
रज्जुर्मानाधिका कार्या अध्वरे योगमिच्छता ॥१२॥

शाणी वा बाल्वजी चैव वैणवी वा विधीयते ।
रज्जुस्तूभयतःपाशा त्रिवृता यज्ञकर्मणि ॥१३॥

रज्जुर्मुञ्जमयी कार्या शणैस्तु परिमिश्रिता ।
कात्यायनो वदत्येवमखोडा कुशबल्वजैः ॥१४॥

अखोडा = अखण्डा ॥१४॥

नवके लक्ष्णं कुर्यात् त्रीणि कुर्यात्त्रिषु त्रिषु ।
उत्तमो नवकः पाशः सदसो मानमुच्यते ॥१५॥

प्रथमं नवारत्निषु चिन्हं श्रोणिमानार्थम्, ततस्त्र्यरत्निषु श्रोणिभागे निरञ्छनार्थम्, पुनस्त्र्यरत्निष्वंसनिरञ्छनार्थम्, ततोऽपि त्र्यरत्निष्वंसार्थम्, ततो नवसु पाश एव ॥१५॥

पञ्चदशमेकविंशं त्रिक्रमपरं च परतस्त्रिकं चापि ।
द्वादशसु पाश उत्तम इति सोमे रज्जुमानमिति ॥१६॥

पञ्चदशसु श्रोणिनिरञ्छनार्थं चिन्हम्, ततश्चिन्हादेकविंशति प्रक्रमेष्वायमनार्थं संख्यासमासभङ्गचिन्हम्, ततस्त्रिषु प्रक्रमेषु निरञ्छनचिन्हम्, ततोऽपि त्रिष्वंससमानयनार्थं चिन्हम्, (चतुर्विंशतिप्रक्रमा हि प्राची) ततो द्वादशसु पाश एवेति चतुष्पञ्चाशत्प्रक्रमा रज्जुः प्रमाणार्द्धं वाऽभ्यस्येति कथिता ॥१५॥

पदस्याक्ष्णया, तिरश्ची याऽनयोरक्ष्णया भवेत् ।
सौत्रामण्यां निमातव्या वेदिः स्यात्सोमवत्तया ॥१७॥

पदक्षेत्रस्याक्ष्णया पार्श्वमानी, तिरश्ची = तिर्यङ्मानी, तयोरक्ष्णया तृतीयकरणी सौत्रामण्यां प्रक्रम इत्यर्थः । एवं च परिशिष्ट-

कृतोऽपि त्रिपदप्रक्रमतृतीयांश एव सौत्रामण्यां प्रक्रमक्षेत्रमिष्टमिति गम्यते। केचितु "सोमे तु द्विपदो भवेत्" इति यः परिशिष्टे द्विपदः सौमिकः प्रक्रम उक्तः, तत्तृतीयभागसंक्षेपिकां तृतीयकरणीमाहुः, तन्न। पदस्याद्गणयेत्यादिपरिशिष्टवाक्यान्तरविरोधापातात्। तेन चयनवेदिरपि सोमवेदिरेव। अग्निः सोमाङ्गमित्युक्तत्वात्। तत्र यः प्रक्रमस्त्रिपदस्तस्य तृतीयभागसंक्षेपिका या करणी सैव सौत्रामण्यां प्रक्रमः। चयनानन्तरं च तदङ्गत्वेनापि श्रुतौ सौत्रामणी पठितेति सैव वेदिः प्रस्तुता। द्विपदप्रक्रमस्त्वनग्निकसोमवेदेर्विषय इति ॥१७॥

नीहारेण घनैर्वाऽपि ज्योतिषामभ्रदर्शने।
अप्सु दीपं प्रगृह्णीयाद्यावत्तमसि दर्शनम् ॥१८॥
प्रमाणं च प्रमेयं च यच्चान्यद्वस्तुसंज्ञकम्।
सर्वं तच्छास्त्रतो ज्ञात्वा यज्ञे सिध्यन्ति याज्ञिकाः ॥१९॥
यथा न क्षीयते मानं यथा च न विवर्धते।
यथा च रमते दृष्टिस्तथा योगं समाचरेत् ॥२०॥
अरत्निश्चतुरस्रश्च पूर्वस्याग्नेः खरो भवेत्।
रथचक्राकृतिः पश्चाच्चन्द्रार्ध इव दक्षिणः ॥२१॥
अग्नीनां तु खरः कार्यो मेखलात्रयसंयुतः।
द्वादशाङ्गुल उच्छ्राये विस्तारे चतुरङ्गुलः ॥२२॥
तन्तुः पुष्करनालस्य षड्गुणः परिवेष्टितः।
वत्सतर्यास्त्रिहायण्या बालेन सदृशो भवेत् ॥२३॥
त्रयस्त्रिहायणीबालाः सर्षपार्धं प्रचक्षते।
द्विगुणं सर्षपं विद्याद्यवः पञ्च तु सर्षपाः ॥२४॥
अङ्गुलस्य प्रमाणं तु षड्यवाः पार्श्वसंस्थिताः।
चतुर्विंशाङ्गुलोऽरत्निर्विंतस्तिर्द्वादशाङ्गुलः ॥२५॥
व्यामस्यात्र प्रमाणं तु चतुर्न्यूनं शताङ्गुलम्।
पुरुषस्य प्रमाणं तु विंशतिस्तु शताधिका ॥२६॥

विंशतिशताङ्गुलः पुरुषः, तत्पञ्चमोऽशोऽरत्निः, चतुररत्निर्व्यामः।

प्ररत्नि चतुर्विंशो भागोऽङ्गुलम्, अरत्न्यर्धो वितस्तिः, अङ्गुलस्य षष्ठोंऽशो
ावोदरविस्तारः, तस्य पञ्चमोंऽशः सर्षपः तस्यार्द्धं सर्षपार्द्धम्, तस्य
तीयोंऽशस्त्रिहायणीबालः, तस्य षष्ठोंऽशः पुष्करतन्तुरिति सङ्ग्रि-
ोऽर्थः ॥ २६ ॥

हिरण्यशकलार्थे तु हिरण्यं यस्य नोच्यते ।
कृष्णलेनैव तद्याख्या यज्ञे सिद्ध्यति याज्ञिकी ॥२७॥
कृष्णलं त्रियवं मानं ताम्रायसमतः परम् ।
सुवर्णार्धं च माषाणां सुवर्णश्च त्रिसप्ततिः ॥२८॥
त्रीणि चैव सहस्राणि दद्याद् बहुसुवर्णके ।
भूयः स्थपतितो ज्ञात्वा संज्ञास्वन्यासु मानवित् ।
स्वर्णकारो यथाऽभ्यासात्तथा भूयो विवर्धते ॥२९॥
ह्रसते शोषपाकाभ्यां द्वात्रिंशद्भागमिष्टका ।
तस्मादार्द्रप्रमाणं तु कुर्यान्मानाधिकं बुधः ॥३०॥
अज्ञात्वा शुल्बसद्भावं यज्ञे सौत्रामणीसुते ।
वेदिं ये कर्त्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैः ॥३१॥
दण्डरज्ज्वर्द्धमभ्यस्य षष्ठे त्वर्धस्य लक्षणम् ।
तथैव चेतरत्रापि तिर्यङ्मानं यदृच्छया ॥३२॥
यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत् ।
आगमार्द्धे भवेच्छङ्कुस्तदर्द्धे च निरञ्छनम् ॥३३॥

आगमोऽभ्यासभागः, आगमार्द्धे शङ्कुः श्रोएयंसार्थः, अन्तरर्द्धे
ख्यासमासभङ्गागमार्द्धचिह्नयोरन्तराले निरञ्छनचिह्नम् ॥ ३३ ॥

आधाने पदिकं कुर्याद् द्विपदः सौमिको भवेत् ।
अग्नौ च त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः ॥३४॥
कृत्तिका श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरम् ।
एतत्प्राच्या दिशो रूपं युगमात्रोदिते पुरः ॥३५॥

षडशीत्यङ्गुलं युगमात्रं यदोदितं कृत्तिकादिनक्षत्रमाकाशमारो-
ते, तदा तदुपलक्षिता प्राची ज्ञेया ॥ ३५ ॥

पञ्चाशच्छर्कराः पश्चात्पूर्वे देयास्त्रिसप्ततिः ।
दक्षिणे तु प्रदातव्या दश पञ्च च सप्त च ॥३६॥
शंस्यश्चतुर्विंशतिपार्श्वभागश्चतुर्दशैराविलिखेत्तु नर्यम् ।
तथैव चाष्टद्विगुणैरथर्यस्त्रिंशद्विरायम्य हरेत्तृतीयम् ॥३७॥
अग्नेरुदक् सार्द्धनवाङ्गुले मध्यं ततो लिखेत् ।
वृत्तमेकोनविंशत्या प्राची ज्या मध्यगा भवेत् ।
उदगर्द्धं विहायार्वाक् खरोऽग्नेर्दक्षिणस्य तु ॥३८॥

दक्षिणाग्निस्थानादुत्तरतः सार्द्धेषु नवाङ्गुलेषु मध्यं प्रकल्प्य तत एकोनविंशत्यङ्गुलमितव्यासार्द्धेन वृत्तं कृत्वा तन्मध्ये प्राची रेखारूपा कार्या, तया वृत्तं द्विधा विभक्तं भवति, तत उत्तरभागमपहाय दक्षिणभागेऽरत्निमितो दक्षिणाग्निखरो विधेयः ॥३८॥

सूत्रदोषदरिद्रस्य गूढमन्त्रस्य धीमतः ।
समाप्तेयं क्रिया शौल्वी कात्यायनमहात्मनः ॥३९॥

सूत्रस्य ग्रन्थविशेषस्य दोषा असामञ्जस्यादयः, तैर्दरिद्रस्य रहितस्य, गूढत्वेन स्वं प्रभावमाख्यापयतो धीमतः शौल्वी क्षेत्रमान-सम्वर्द्धिनी । शुल्ब माने । शुल्बनं शुल्बः । तस्येदमित्यण । टिड्ढेति ङीप् ॥३९॥

इति कातीयशुल्बसूत्रवृत्तौ सप्तमी कण्डिका ॥ ७ ॥
इति श्रीमन्महामहोपाध्यायाहिताग्नि पं० श्री १०६
प्रभुदत्तशर्मसुत-श्रीविद्याधरशर्मकृता कात्या-
यनकृतशुल्बसूत्रवृत्तिः समाप्ता ।
शमिति ।



कातीयशुल्बसूत्राणामकारादिक्रमेण सूचीपत्रम् ।

पृष्ठाङ्काः		सूत्रा०
	अ	
१३	अक्ष्णया तिर्यङ्मानी शेषः	१।१३
१५	,,	१।१५
५२	अग्नीनां तु खरः का०	७।२२
५४	अग्नेरुदक्०	७।३८
५२	अङ्गुलस्य०	७।२५
१३	अङ्गुलैरथ०	७।१२
५१	अजीर्णा०	५१।१२
५२	अज्ञात्वा शु०	७।३१
२३	अतिदीर्घे चेत्०	३।३
४१	अथ त्रिपुरुषां०	५।१२
९	अपरिमितं०	१।२३
१२	अपि वाऽन्तर०	१।२९
५२	अरत्निश्चतु०	७।२१
२८	अर्धप्रमाणेन०	३।८
	आ	
३७	आद्योऽग्निर्द्वि०	४।१०
५३	आधाने पदिकं०	७।३४
	इ	
१०	इतरस्य०	१।२६।
	उ	
३६	उत्तरेषु०	४।९
१५	उपदिष्टं युग०	२।९
३४	उभयतः प्रउगं०	४।७
३३	उभयतः प्रउगे०	४।५
	ए	
३६	एककर्णानां०	४।१०
५०	एकतक्ष०	७।९
३७	एकविर्ठ०श०	४।११
४९	एके प्रथमोत्तमौ०	६।२
८	एतेन०	१।१९
३५	एतेनैव०	४।८
५	एवमुत्तरतः	१।९
४६	एवमेवैक०	६।५
२९	एष निर्ह्रास०	३।११
	क	
१४	करणी तत्करणी०	२।७
१८	करणीतृतीयं०	२।१६
१७	करणीं तृतीयेन०	२।१२
५३	कृत्तिका श्रवणः पु०	७।३५
५३	कृष्णलं त्रियवं०	७।२८
	ग	
११	गार्हपत्याहवनीययो०	१।२७
	च	
२९	चतुरस्रं०	३।१३
५१	चतुरस्रं मु०	७।३१
२०	चतुरस्राच्चतु०	३।१
२९	चतुर्थेन षोड०	३।१०
१३	चतुःशतमक्षः	२।३
१३	चत्वारोऽष्टकाः	२।५
	त	
१३	तत्राष्टाशीति०	२।२
९	तत्रोदीची०	१।२१
३	तदन्तरर्ठ० रज्ज्वा०	१।३
३१	तदशमेना०	४।३
५२	तन्तुः पुष्कर०	७।२३
३९	तस्य दशमेन	५।६
५०	तिर्यङ्मान्याश्च०	७।५

१९	तुल्यप्रमाणाना०	२।१९	२९	पुरुषं वा०	४।१५
१८	तृतीयकर०	२।१५	४०	पुरुषं वा स०	५।१०
२८	तृतीयेन०	३।९	३७	पुरुषाभ्यासे०	४।२२
४८	तेन वेदिं निर्माय०	६।१०	१४	पैतृक्यां०	२।६
५२	त्रयस्त्रिंहायणी०	७।२४	३३	प्रउगं चतु०	४।६
१९	त्रिकरणी०	२।२०	३२	प्रउगे०	४।४
५३	त्रीणि चैव०	७।२९	४५	प्रक्रमेण वा०	५।४
			६	प्रमाणमभ्यस्य०	१।१२
			१८	प्रमाणवि०	२।१५
			२७	प्रमाणं चतु०	३।५
			५२	प्रमाणं च प्र०	७।१९
			१७	प्रमाणं तिर्यगद्वि०	२।१३
			६	प्रमाणार्द्धं वा०	१।१४
			७	प्रमाणार्द्धं०	१।१६
			१०	प्रमाणे०	१।२४
			६	प्राच्यन्तयोः श०	१।६
			५०	प्रादेशमात्रो०	६।९
			४९	भवन्ति चात्र०	७।१३
			३०	मण्डलं चतुरस्र०	३।१४
			३२	मण्डलेऽप्येवम्	४।३
			४२	यथाग्नि वेदी०	६।१
			५२	यथा न क्षीयते०	७।२०
			४७	यथायूपं०	६।१
			४२	या करणी०	६।३
			४८	या रज्जुरे०	५।९
			२८	यावत्प्रमाण०	३।७
			२९	यावत्प्रमाण०	३।१३
			४६	यावत्प्रमाणानि०	६।९
			५३	यावत्प्रमाणा रज्जुः	७।३३
			१०	योगश्च	१।२१

द

५२	दण्डरज्ज्वर्द्धं०	७।३२			
१६	दीर्घचतुरस्र०	३।२			
२२	दीर्घचतुरस्रार्द्धं० स०	३।३			
३०	द्रोणचिद्रथ०	४।१			
३१	द्रोणे यावानग्निः सप०	४।२			
४५	द्वितीये वा	५।३			
१५	द्विपदा तिर्यङ्मानी०	२।९			
५०	द्वितिवस्ति०	७।८			
२८	द्विप्रमाणा०	३।६			
४९	द्विहस्ते०	७।२			

न

५०	न जलात्सम०	७।४			
१९	नव भागास्त्रय०	२।१७			
५१	नवके लक्षणं०	७।१५			
२०	नानाप्रमाण०	२।२			
४६	नान्तःपात्य०	५।६			
४१	नारत्निवितस्तीनां०	४।१९			
५२	नीहारेण०	७।१८			

प

५१	पञ्चदशमेक०	७।१५			
४०	पञ्चदशभा०	५।८			
४०	पञ्चारत्निः	५।९			
५४	पञ्चाशच्छर्कराः	७।३६			
१५	पदं तिर्यङ्मानी	२।८			
५१	पदस्याक्ष्णया०	७।१७			
४८	पार्श्वयोर्वा०	६।११			

र

५१ रज्जुर्मुञ्जमयी० ७।१४
१ रज्जुसमासं व० १।१
३ रज्ज्वन्तयोः पा० १।४

व

५ विपर्यस्ये० १।१०
११ विपर्यस्यो० १।२८
१२ विपर्यस्योत्त० १।३०
५२ व्यामस्यात्र ७।२६

श

८ शकटमुखस्य० १।१८
८ शङ्कोः पार्शौ० १।८
५४ शंस्यश्चतु० ७।३७
५१ शाणी वा बाल्वजी० ७।१३
८ शालामानं च १।२०
५० शास्त्रबुद्ध्या ७।६
७ शास्त्रवदर्धे १।१७
५ श्रोण्यठ०स० १।५
७ ,, १।७

ष

५० षडङ्गुलप० ७।७
१३ षडशीतिर्युगम् २।४

स


९ सदसश्चैवम् १।२२
२५ समचतुरस्र० ३।४
१६ समचतुरस्रस्या० २।१२
३८ समस्तं पञ्च० ४।१३
२ समे शङ्कुं० १।२
६ स समाधिः १।११
५४ सूत्रदोष० ७।३९
४९ सैषा शिख० ६।१३
१९ सौत्राम० २।१९
५० संख्याज्ञः ७।३
५३ स्वर्णकारो० ६।२९

ह

५३ हिरण्यशकल० ७।२७

7102





Q2:456
N28

VERIFIED 1989

VERIFIED - 2001

Acc. No. 7162
Call No. Q2:456
N28
Author Katyayana
Title Sulbasutram